१० / ३(A-B)

अथ

१० / ३(A-B)

(A) ग्रन्थनामः- "प्रत्यक्षखण्डाशीतिकण्ठी" 784

कर्तृनामः- श्रीकण्ठः

Pratakshakhandshiti Kanthi

विषयः- न्यायशास्त्रम्

(B) ग्रन्थनामः- "धातुरूपावलिः" 2096

कर्तृनामः- [illegible]

विषयः- व्याकरणम्

90/3(A) (तर्कप्रकाशटीका)

प्रत्यक्षखंडशितिकं
टीप्रारंभः ।

९०/३

90/3(A)

त.प्र.
१

श्रीगणेशाय नमः ॥ श्रीवागीश्वर्यै नमः ॥ संध्याकृत्प्रणतिप्रसक्तोऽतिरिक्तवामेतरार्धसमालोकितेर्ष्यमानिनिमानकृद्याहत्वदूपरा
नामास्ति वंद्यास्मि किं तु लोमहमानमानिनि मा नासि ध्यातावात्तैवाकृतौ रिंखेह हर्षितशैलराजतनयाहूतः शिवः पातु नः ॥१॥ सिद्धां
तगुरुवर्गे भावनाया शालिनो श्रीकेदारनिर्मितात्सेयं कृतिरातनुतां मुदं ॥२॥ समस्तकस्मिन्न्यायविबोधे के साधकसहस्रस्याप्यकिं
चित्करत्वेन प्रतिबंधकाभावस्यावश्यापेक्षितत्वात्प्रकृतग्रंथसमाप्तिप्रतिबंधकदुरितनिवृत्तिविघ्नविधानाय कृतं भगवन्नमस्का
रात्मकं मंगलं शिष्यशिक्षार्थमाहो निबध्नाति ॥ प्रारिप्सितेति मंगलस्य समाप्तिं प्रति विघ्नध्वंसद्वारा हेतुत्वमिति सिद्धांतसिद्धि
तिः ॥ तत्रान्वयव्यतिरेकनियतपूर्ववर्तित्वरूपकारणत्वघटकान्वयव्यतिरेकयोः ग्राहकैव्यापकत्वरूपनियमो ग्राह्यग्राहकेण
स्वव्याप्येतराघावच्छे कारणत्वे यत्सत्वे यत्सत्त्वं यदभावे यदभाव इति नियमघटितयोर्नियतान्वयव्यति
रेकयोः कारणत्वे मानाभावे विशेषान्वयव्यतिरेकाभ्यां विशिष्टतद्रूपकारणत्वग्रहे व्यतिरिक्तकारणत्वग्रहेणानयो
र्हेतुत्वानवच्छेदकत्वेन प्रमाणाभावात् तस्मात् नात्र संभवः मंगलसत्त्वेपि समाप्त्यसत्वान्मंगलाभावे समाप्तिसत्त्वा राम
च्चान्वयव्यतिरेकव्यभिचारात् तथापि समाप्तिफलकत्वे लाघवमिति लाघवज्ञानसहकृतेन शिष्टाचारविषयत्वहेतुकं १

सफलत्वानुमानमिवात्रमानं जन्मांतरीयमंगलसंदेहेन व्यतिरेकव्यभिचारसंशयेपि दृढशंकापस्यानुमितिप्रतिबंध
कतया समाप्तिकारणत्वेऽनुमिते समाप्तिरूपकार्येण जन्मांतरीयमंगलानुमानान्न व्यतिरेकव्यभिचारः मंगले स
ति समाप्त्यभावश्च तज्जन्ममंगलानाश्यविघ्नसत्वात् नेतरोन्वयिविघ्नसत्वाद्धेतिनान्वयव्यभिचारोपि तत्रावच्छेदकयाम
ध्येपि मंगलमाचरंति। एवं चाशुविनाशिनः कालांतरभाविफलजनकत्वं व्यापारं विनानुपपन्नमिति विघ्नध्वंसद्वारा स
माप्तिप्रति मंगलं हेतुरिति संप्रदायः न च वाच्यं मंगलं विनापि विनाप्तिकादिग्रंथसमाप्तेर्दर्शनान्नैतत्वे हेतुः न च चरमव नत्र
र्णरूपायाः चरमवर्णध्वंसरूपाया वा समाप्तेराकाशनिष्ठतया आत्मनिष्ठस्य मंगलस्य तज्जन्यविघ्नध्वंसस्य वा व्याधि
करणतया कथं कारणत्वं संभवेत् स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रत्यात्मश्रयता
संबंधेनात्मनिष्ठप्रत्यासत्या हेतुत्वस्य वक्तव्यतया जन्मांतरीयमंगलानुमानान्न व्यभिचार इति वाच्यं जन्मांतरीयसमाप्ति
मुद्दिश्य शिष्टैः कृतस्याचरणतः प्रारिप्सितसमाप्तेरेव तत्फलत्वं कारीरीवत् न तु जन्मांतरीयसमाप्तेरपि पुत्रेष्टिस्थले तु पु
त्रमात्रफलकत्वस्याचरणादामुष्मिकसाधारणफलकत्वं तस्मादात्मनिष्ठप्रत्यासत्या कारणत्वे जन्मांतरीयसमाप्तिर्न मु

स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणक्षणो-
त्पत्तिकत्व ॥५

त॰प्र॰ २ दृश्यापि मंगलकारणतावच्छेदकस्य प्रतियोगिचरमवर्णावच्छेदकतासंबंधेन चरमवर्णध्वंसस्य समाप्तिं प्रति स्वोत्पत्त्यवच्छे-
दकजातीयत्वसंबंधेन शरीरनिष्ठप्रत्यासत्त्याकारणतायाश्चावश्यकत्वात् यत्र नास्तिकशरीरावच्छेदकतया मंगलस्य त-
त्रैव विघ्नध्वंसस्य चाभावेन व्यतिरेकव्यभिचारात् कारणत्वासंभवः॥ ननु विघ्नध्वंसलीयसमाप्तित्वमेव तज्जन्यतावच्छेदकं
तत्र च न व्यभिचारः विघ्नध्वंसलीयत्वं च विघ्नध्वंसजातीयशरीरकर्तृकत्वं मंगलजन्यविघ्नध्वंसविशिष्टत्वं वा विशिष्टत्वं
च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्व स्वाव्यवहितोत्तरत्वोभयसंबंधेन जन्मान्तरीयमंगलजन्यविघ्नध्वंसस्य
च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वसंबंधेन नास्तिकसमाप्तावभावेन तस्याः कार्यतावच्छेदकानाक्रान्तत्वादिति चेन्न
प्रथमे समाप्त्यव्यवहितपूर्वविघ्नासत्त्वेन तस्य विशेषणत्वासंभवात् उपलक्षणत्वे तु प्रमत्तानुष्ठितसमाप्तेरपि तज्जन्यसमा-
नविघ्नध्वंसजातीयशरीरकर्तृकतया व्यभिचारस्य दुर्वारत्वात् अन्यविघ्नस्य च विघ्नध्वंसजातीयशरीरनिष्ठत्वेन जन्यत्वस्य
नकर्तृकत्वस्य दुर्वचत्वात् द्वितीये तु समाप्त्यव्यवहितपूर्वक्षणान्तर्भावे तन्निवेशे गौरवात् निर्विशेषणावच्छिन्नत्वस्य च व्याप्यत्वात् राम २
याऽननुगमात्॥ कारणस्य कार्यतावच्छेदकत्वानुगमात् अन्यथा काशीमरणस्यापि तत्त्वविशिष्टमुक्तिं प्रति हेतुत्वस्य तु

वचनात्काशीमरणान्मुक्तिरिति श्रुते हेतुत्वयोग्यतयैवोपपत्तौ प्रयोजकत्वपरत्वोपवर्णनस्यानावश्यकत्वात्। न च त-
मेव विदित्वेति श्रुत्या तत्त्वज्ञानस्यैव मुक्तिसामान्यहेतुत्वप्रतिपादनेन तस्य साक्षात्कारणत्वासंभवात् श्रुतेः प्रयोजकत्व-
परत्वमेवेति वाच्यं। तावतापि तत्त्वज्ञानद्वाराहेतुत्वस्य दुष्परिहरत्वात् विघ्नध्वंसद्वारा समाप्तौ मंगलस्येव तत्त्वज्ञानतत्त्वज्ञानवि-
शिष्टमुक्तिं प्रति काशीमरणस्य हेतुत्वे संप्रतीतौ व्यवधानेन तन्मुक्तिहेतुरिति वाच्यं। तज्जन्यविघ्नध्वंसविशिष्टसमा-
प्तिं प्रति मंगलस्य हेतुत्वेपि तस्य दुर्वारत्वात्। तस्मादन्यथासिद्धतया मंगलेन समाप्तिहेतुः। एतेन काशीमरणविशिष्टमुक्तौ
काशीमरणस्य हेतुत्वे इष्टापत्तिः तत्त्वज्ञानमात्रद्वारा कृत्वा न तद्धेतुरिति तु वचनायैवं च श्रुतेः प्रयोजकत्वपरत्वमिति निरस्तं।
तथापि तद्द्वारा समाप्तिहेतुतायो धकप्रत्यक्षं श्रुत्यभावेनोक्तदिशा मंगलेऽन्यथासिद्धेर्दुर्वारत्वादिति। न च निर्विघ्नसमा-
प्यतामितिकामनया तदाचारात् समाप्तिलफलत्वमिति वाच्यं। नापद्दातविशेषणान्यायेन विघ्नध्वंसकामनाया आवश्य-
कत्वात्। तस्यैव तत्फलत्वात्। न हि यादृशिपक्षिंयते तत्तत्तद्धेतुः। चैत्यवंदनोहे रविस्वर्गफलकत्वायत्तेः। तज्जन्ये फीभूतज्ञा-
नस्य भ्रमत्वापत्तेरिति चेन्न अज्ञोविसमाप्तिजनकत्वज्ञानस्य भ्रमत्वमाहात्पविवादसंभवात्। पाकप्रकृतिकालेऽपि

३ बुद्धिविशेषमुपसंक्रामतीति न्यायः ३

त॰प्र॰
३

कामनाविषयत्वेष्टसाधनताज्ञानेन मङ्गलकामनाया अप्युपपत्तेः। किंच किंचिदेतत्। अत एव नास्तिकसमाप्तिप्रति
योगिव्याप्तेन चरमवर्णविजातीयध्वंसत्वाकृतविजातीयचरमवर्णध्वंसरूपसमाप्तिं प्रति मङ्गलं हेतुरिति निरस्तं। पुरुषविशेषज
न्यतावच्छेदकजातिव्याप्यानन्तजातिकल्पने प्रमाणाभावात्। अथ मेरुकूपे साधनत्वासिद्धिस्त्वत्राह। तस्मात् विघ्नध्वंस
एव मङ्गलस्य फलं। समाप्तिस्तु अध्ययनकूपसामग्रीतः। गौरवपराहतेति प्राहुरिति कृतं पल्लवितेन॥ अथ मङ्गलस्योत्क
र्षः अहमस्मात् परकृष्ट इति ज्ञानविशेषरूपं नमस्कारपदार्थः अलंकृतोऽलमिति तत्त्वात्। परमात्मानमिति। परमत्वं च
निरस्ताखिलदोषत्वेन सर्वोत्कृष्टत्वं॥ तथा च समानसंविन्त्वेऽवधेयस्तदपेक्षया अपकृष्टत्वे ज्ञाते सर्वे ततः पाति नि
त्वस्मिन्नपकृष्टत्वज्ञानान्नमस्कारानिर्वाह इति भावः। ननु तत्र परमम हरेर्मापवत्वे। नाहं शरणीमाप्तविशिष्टानां
त्वस्य स्वापेक्षया अपकृष्टत्वेन नमस्कार्यतावच्छेदकत्वाभावात्। यद्यपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव
इति नियमेन सुखसमवायिकारणतावच्छेदकतयात्मत्वस्य [illegible] तादृशनियमाभावे
ऽपि नित्यज्ञानजनकत्वाजन्यत्वे [illegible] कारणताया व्याप्यत्वादीश्वरे आत्मत्वजातिसत्त्वे प्रमाणाभावस्तथापि आत्मपदशक्य

व्या

एम
३

तावच्छेदकतया आत्मत्वं जातिसिद्धा धारणीति ध्यानि कार्यतावच्छेदकतया कारणतावच्छेदकतया च जातिसिद्धिवद
सतिबाधके शक्यतावच्छेदकतया जातिसिद्धेः इष्टत्वात् सतिबाधक इति विशेषणोपादानाद् भावपदशक्यतावच्छेदकत
याभावत्वादिर्जातिसिद्धिः। जन्याभावत्वावच्छिन्नं कारणतानिरूपितकार्यतावच्छेदकतया ध्वंसत्वादेरपि जातित्वापत्तिः तद्वि
शेषणस्याप्यवश्यकत्वादित्याहुरलं विस्तरेण॥ तथा सति विभुपदशक्यतावच्छेदकतया विभुत्वमपि जातिः स्यादिति चेन्न
न चेष्टापत्तिः। एवं विधानन्तजातिकल्पने प्रमाणाभावादिति कारणतावच्छेदकतया कार्यतावच्छेदकतया च जातिसिद्धि
रित्येकाकारणीयं। एवं च सुखसमवायिकारणतावच्छेदकात्मत्वजातेरीश्वरसाधारण्ये प्रमाणाभावश्चेदवतु नतु नादि
शक्यतावच्छेदकतया जातिसिद्धिरिति भ्रमो येनोक्तानुपपत्तिः स्यात्। [illegible] अपि तु सुखसमवायिकारणतावच्छेदकत्वेन
जीवात्मनि सिद्धस्यात्मत्वस्य श्रौतात्मत्वव्यवहारबलेनोन्नीतत्वं च धर्मात्रे ईश्वरे कल्प्यते नित्यस्वेच्छाद्धि नियमस्य वा प्रयोजकत्वा
त्। अदृष्टरूपसहकारिविरहादेव कार्याभावस्योपपन्नत्वात्। अत एव ज्ञानजनकत्वाहं [illegible] विशेषगुणकारणताकल्पने च प्रमा
णाभावस्तत्र पुरुषः प्रकृतेः तु श्रौतात्मत्वव्यवहारस्यैव प्रमाणत्वेनात्मतान्जनकताधारणरूपेऽविकारणत्वकल्पने इति विरहा

व्या१

तानवसुत्वसमवायिकारणतावच्छेदकं द्रव्यत्वमेवातिप्रसक्तत्वेपि स्वात्मत्वस्यैवावच्छेदकत्वे लाघवकाभावादिति वाच्यं कार
णत्वानतिप्रसक्तस्यैव कारणतावच्छेदकत्वयाग्यतानादिवृत्तिकारणत्वसंबंधकल्पने गौरवात्तथात्वेनापि हेतुतापत्तेः सं
भवति व्यापकधर्मे कारणतावच्छेदके व्यापकधर्मेणान्यथासिद्धो अतिप्रसक्तोपि बीजत्वात्। तस्मात्तु द्रव्यत्वेपि तुल्य
त्वात्। स्वात्मत्वेन घात्वेविशिष्टो तान्मयव्यवहारवत्वादिरिष्टो विकारणत्वसंबंधस्य कल्पनीयतयातिप्रसक्तोभावादित्थं
चात्मपदशक्यतावच्छेदकत्वमपि तस्यैवेति सिद्धं। न च नानात्मनः एकवपूर्वदेशसंयोगे उत्तरदेशसंयोगोत्पत्त्युत्तरदेशसंयो
गपूर्वदेशसंयोगः प्रतिबंधको वाच्यस्तत्र ननु तावत्पूर्वदेशत्वं मुक्तादेशाभिन्नत्वमुत्तरदेशाभिन्नत्वं तु तत्पूर्वदेशसंयु
क्तस्यैवेषोत्तरदेशसंयोगान्न किंचित्साम्यत्वं तत्। तथा चात्मसंयोगत्वेन प्रतिबंधकतैव न यायात्। एवं चन प्रतिबंधकताव
च्छेदककोटिप्रविष्टत्वेनात्मत्वजातिसिद्धिः। विनिगमनाविरहेण तत्स्याईश्वरसाधारणमपि। न चैवमेकस्मिन्नोप्य
पि एव सा जातिः। तत्र नलने केषु जीवात्मत्वमिति वाच्यं। एकव्यक्तिकत्वेन तस्या जातित्वासंभवात्। नानेकधर्मस्वीकारेपि
प्रत्येकं जीवमात्रीयविनिगमनाविरहेण तादृशवृत्त्यात्मा। न चात्मनिष्ठपितृत्वविशिष्टसंयोगत्वेन प्रतिबंधकत्वे आत्मनिष्ठ

पितृत्वसंयोगत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेणाविजातीयसंयोगत्वेनैव तत्प्रतिबंधकत्वं स्यात्। तथा च प्र
तिबंधकतावच्छेदककोटिप्रविष्टत्वात्रात्मत्वजातिसिद्धिरिति वाच्यं। संयोगसंबंधेनात्मनो पि विनिगमनाविरहेण प्रति
बंधकत्वस्य दुर्वारत्वात्। न चैवं तज्जातेरीश्वरवृत्तितानादिष्टापित्वप्रसंगादिति वाच्यं। नानात्मनामीश्वरानतिरिक्तत्वे
न तन्मात्रधारणेपि पिसाचतिविरहादिति पुनर्निर्णीतो लौकिकः पदार्थ इति प्राहुः। प्रणम्येति। एकोनपदस्वरूपैतदृश्यनेनान्वयः।
नमस्कारत्वे निषेधेनेमः पदेनेवसंभावितः प्रणाममस्य कर्तव्यापेक्षयापूर्वभावे दर्शितेएवविशिष्य यायापेक्षेकुर्वन्निति विशिष्य शिक्षा
र्थमेवोक्तौ तेन ननिर्देशः। अत्र प्रशादेन भक्तिप्रकर्षातिशयो द्योत्यते। युक्तिमुक्तावलिरिति नेन युक्तीनां मुक्तामालाया रूप
प्रदर्शनेन ननिर्दोषत्वं। प्रंजरी पदेन स्तोयकाक्ष्यावलीनां कोमलत्वसूचितं। प्रकृतिसामान्ये प्रतीष्टसाधनतातानस्य हेतु
त्वात्प्रयोजनं नत्वं विना कथमेतदुदेप्रवर्तितामित्यत आह। इहेत्यादि। मननोपायमात्मनत्वत्वं तानेनिश्चितिललोकवि
मोक्षमुख्योपायमामननेनानिति योजना। तथा च सकलकामनाविषयीभूतापवर्गजनकतत्वज्ञानप्रयोजकत्वे याप्तदृ येन
प्रवृत्यनुपपत्तिरितिभावः। मोक्षमुख्योपायत्वं च मुख्यभावप्रयोजकीभूताभावप्रतियोगित्वं केचित्तु काशीमरणादितो

नव्र. ५ दिश्रवणानधिकारिस्त्रीशूद्रादिलोकस्य मुक्तिसंभवेन मानलनोपायकतत्त्वज्ञानाभावस्य तद्भावप्रयोजकत्वाभावात्
लोकपदस्य श्रवणाधिकारिपरतया व्याख्येये। तथा च श्रवणाधिकारिलोकमुक्त्यभावेन तत्त्वज्ञानाभावस्य प्रयोजकत्वं स्वा
लोकदोषकृतिश्चावस्यैव तत्त्वश्रवणाधिकारिशूद्रादीनामपि काशीमरणादिना मुक्तिसंभवेन तथाविवक्षिते
प्यनुपपत्तेर्जीवाद्गृहकत्वात्। तस्मात्तत्त्वज्ञानेन मोक्षमुख्योपायत्वेनाव्यवहितोत्तरक्षणे तत्त्विकमुख्यभावप्रयोजकीभू
ताभावप्रतियोगित्वमेव वक्तव्यं। तच्च वनोक्तानुपपत्तिः। तथा च लोकपदं यथाश्रुतमेवोक्तमत एव काशीमरणजन्यमुक्ति
भिन्ननोपायकतत्त्वज्ञानजन्यत्वात् विमोक्षेति। काशीमरणाद्यप्रयोज्यमोक्षेत्यर्थः इति निपुणतरमूह्नीयं। ०त्र स्व
समानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसत्वं मुक्तित्वं। दुःखध्वंसस्येदानीमपि सत्वेनास्मदादीनाम
नुपिमुक्तत्वापत्तिवारणाय कालीनान्तं। मुक्त्यात्मकदुःखध्वंसस्यान्तरीयदुःखप्रागभावसमानकालीनत्वात् तदादेव
मुक्तात्मनामपि अमुक्तत्वप्रसंगात् स्वसमानाधिकरणत्वं प्रागभावविशेषणं। न च दुःखासमानकालीनत्वेनैव सामंजस्ये
प्रागभावेति व्यर्थमिति वाच्यं। यथा सन्निवेशेनैव व्यर्थ्याभावात्। तथाप्यनन्तिप्रयोजनकत्वेन स्वसमानाधिकरण एम ५
दुःखासमानकालीनदुःखध्वंसत्वमेव मुक्तित्वं। न तु स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वस्य मुक्ति
त्वमुपलेनस्य तत्त्वज्ञानजन्यतावच्छेदकत्वानुपपत्तेः। स्वपदस्य दुःखध्वंससामान्यपरत्वे पुरुषान्तरीयदुःखध्वंससमाना
धिकरणदुःखासमानकालीनदुःखध्वंसस्येदानीमप्रसिद्ध्यापत्तेः। स्वपदस्य तत्तद्दुःखध्वंसपरत्वे च सामान्यतो मु
क्तित्वस्यैक्याभावेन मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुतायाः असंभवदुक्तिकतायजेरिति चेन्न। स्वसमाना
धिकरणैककालिकविशेषणतासंबन्धेन दुःखवान्यत्वाधिकरणदुःखध्वंसत्वस्यैव मुक्तित्वं यत्वात्। अत्र च स्वत्वस्य
परिचायकतया नोक्तविकल्पावसरः इति। अत्र च ज्ञानादीनां क्षणिकत्वकारणाय विभुसत्वेन योग्यविशेषगुणानाश
ताविच्छिन्नं प्रति स्वोत्तरोत्तरविशेषगुणत्वेन हेतुतया तत एव मुक्त्यात्मकदुःखध्वंसस्य संभवेन तत्त्वज्ञानत्वेन हेतुतायां
मानाभाव इति यदि विभाव्यते तदा दुरितत्वावच्छिन्नदुरितध्वंसत्वमेव मुक्तित्वमवसेयं। न चाग्रे दुरितानुत्पत्त्या दुरितत्वावच्छिन्न
दुरितध्वंसत्वस्यार्थसमाजग्रस्तत्वात् कथं तत्त्वज्ञानजन्यतावच्छेदकत्वमिति वाच्यं प्रमाणाभावस्यैवार्थसमाजग्रस्तधर्म
स्य कार्यतानवच्छेदकत्वे बीजतया प्रकृते च मुक्तितत्त्वज्ञानकार्यकारणभावबोधकवेदस्यैव बीजत्वेनार्थसमाजग्रस्तत्वे

त.प्र.
६ त्वा२

पि कार्यतावच्छेदकेन त्वेबाधकाभावात् । न च सुखदुःखाभावयोरन्यतरस्यैव पुरुषार्थत्वेन मुक्तेरपुरुषार्थत्वप्रसंगा इ
ति वाच्यं वेलवद्द्वेषविषयीभावेऽपि स्वतःपुरुषार्थत्वस्य दुःखाभावस्य दुःखजनकदुरितध्वंसेऽपि संभवादिति । ननु त
थापि काशीमरणान्मुक्तिरिति वाक्येन काशीमरणस्यापि साक्षान्मुक्तिहेतुत्वप्रतिपादनात् मुक्तित्वावच्छिन्नं प्रति
तत्त्वज्ञानत्वेन कारणत्वे व्यभिचार एवेति चेन्न । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुत्या तत्त्व
ज्ञानस्य मुक्तिसामान्यं प्रति पूर्वभावेऽवधारिते काशीमरणस्य तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमित्येव तदर्थो न तु मुक्ति
कं चेन्नत ॥ अथ तथा तयोः परस्परजन्यमुक्तौ व्यभिचारेणोभयत्राव्यवहितोत्तरत्वनिवेशो गौरवात् ॥ न च काशी
मरणस्य तत्त्वज्ञानं प्रति हेतुत्वे विधिरूपश्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणायाव्यवहितोत्तरत्वनिवेशोऽविशिष्ट इति
वाच्यं गंगामरणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय श्रवणादिजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्य
भवतोऽप्यावश्यकत्वात् । श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय परं काशीमरणजन्यतावच्छेदककोटावव्यवहितोत्त
रत्वनिवेश इति तन्निवेशस्यैकत्रैव संभवात् न भवन्मतेऽपि काशीमरणजन्यमुक्तौ व्यभिचारभिया तत्त्वज्ञानजन्यतावच्छेदक

राम
६

कोटावव्यवहितोत्तरत्वनिवेशात्तत्त्वज्ञानजन्यमुक्तौ व्यभिचारवारणाय काशीमरणजन्यतावच्छेदककोटावव्यव
हितोत्तरत्वनिवेश इत्युभयत्राव्यवहितोत्तरत्वनिवेशावश्यकत्वेनातिगौरवादिति ॥ ननु तथाप्युभाभ्यामेव स्वाभ्यां
यथाविधिप्रायश्चित्तानां नातिः ॥ नद्येव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिरित्यनेन कर्मणामपि मुक्तिहेतुत्वप्रतिपादनात्कथं
तत्त्वज्ञानस्यैव मुक्तिहेतुत्वमिति चेन्न ॥ तस्य तत्त्वज्ञानप्रतिबंधकाधर्मध्वंसद्वारा तत्त्वज्ञान एवोपक्षयात् न तु मुक्तिं प्रत्ये
व साक्षात्तस्य हेतुता नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोधात् तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दा
नेन तपसाऽनाशकेनेति विरोधाच्च । किंच यत्याश्रमविहितकर्मणामेव हेतुत्वे गृहस्थस्यापि मुक्त्यप्रसंगः । कर्मणै
व हि संसिद्धिमास्थिता जनकादयः ॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमु
च्यत इति गृहस्थस्यापि मुक्तिश्रवणात् । गृहस्थाश्रमविहितकर्मणामेव हेतुत्वे यतेरमुक्तत्वप्रसंगात् । नहि वैजात्यम
स्ति येनोभयोरपि हेतुत्वमुपपादनीयमिति । अत एव काशीमरणस्य कर्मणांश्चासाक्षान्मुक्त्युपायत्वनिरासाय मोक्षमु
ख्यो ज्ञानयोगस्त्वमुक्त्वो मुक्तः ॥ तेन मोक्षसाधारणकारणं कर्मापि नापि तदर्थः । मुक्तित्वावच्छिन्नं प्रति कार्यतानिरूपितकारणता

न.प्र.
७

अपलं चात्मसाक्षात्कारकारणत्वं॥ तेन श्रवणादीनामपि तत्तद्युक्तिलेन हेतुत्वेऽपि न क्षतिः॥ इति दिक्॥ ननु आत्मनः शरी
रादिभ्यो भिन्नत्वसाक्षात्कारकं तत्त्वज्ञानमिदानीमपि मे भवति तत्कथं न मुक्तिहेतुः अत आह मननोपायमिति॥ मननमु
पायो यस्येत्यर्थः॥ तथा च श्रवणमनननिदिध्यासनप्रयोज्यतत्त्वज्ञानमेव मुक्तिहेतुः न तच्चेदानीं संभवतीति भावः॥
यद्यपि श्रवणोपायमित्येव वक्तुमुचितं तथापि प्रकारानुप्रासवशात् मननोपायमित्युक्तं॥ युक्तिभिरनुचिंतनं मननं॥
साधकबाधकप्रमाणोपन्यासरूपयुक्तिभिः श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति स्मरणात्॥ श्रुतस्यार्थ
स्यैकतानेन दीर्घकालमनुसंधानं निदिध्यासनमिति बोध्यं॥ तद्धितीति॥ तत्त्वज्ञानमित्यर्थः॥ नीलघटादेस्तु दूरः सच्चमानानाम
दोषदर्शनात्मकं ज्ञानं लाघवपुरस्कारकत्वं किंतु मुख्यविशेष्यस्यैव स्यात्तो श्रुत्वा विपर्ययोपस्थितेन तत्त्वज्ञानस्यैवोपस्थापना
त्तु तत्त्वज्ञानमित्यर्थः॥ मननं समुच्चयविशेषतया पूर्वमनुपस्थितं तेन तद्धेतुत्वाभावादित्यवधेयं प्रमाणाधीनमि
तिः प्रमाणज्ञानप्रयोज्यमित्यर्थः॥ श्रवणादिप्रयोज्यमात्मनि इति विभिन्नतत्त्वज्ञानेऽव्याप्तिः तत्त्वज्ञानेनेतरपदार्थतत्त्व
ज्ञानेऽपि नातत्त्वप्रमाणज्ञानं विना प्रमेयव्यवस्थितेः प्रमाणज्ञानाधीनत्वादिति प्रमाणनिरूपणमावश्यकमिति

रम
७

भावः॥ यद्वा तत्त्वज्ञानस्य मननद्वारा प्रमाणाधीनत्वं स्वत एवापि मननोपायमित्युक्त्या बोधयं वस्तुतस्तु बहुमुख्यविहितो
पस्थितविशेषणस्यापि तद्धेतुत्वेन परामर्शदर्शनात् अत्र बहितोपस्थितमुख्यविशेष्यमात्रोपस्थापकत्वनियमस्यो
न्मार्गिकत्वात्तात्पर्यस्यानियामकत्वाच्चेनोक्तमिति प्रमेयं॥ एवं च तत्त्वमननं चेत्यर्थः॥ साधकबाधकप्रमाणोपन्यासरूपयु
क्तिभिरनुचिंतनरूपमननस्य प्रमाणज्ञानं विनाऽसंभवादिति भावः॥ प्रमाणं निरूपयति॥ लक्षणोद्देशपरीक्षाप्रकारकथ
नमानानिरूपणाविषयीभूतं प्रमाणमित्यर्थः॥ तत्रेति प्रमाणनिरूपणे इत्यर्थः॥ प्रमायाः करणमिति॥ अत्र प्रमाण
शब्दव्युत्पत्तिलभ्यतावच्छेदकं प्रमाकरणत्वं लक्षणं॥ नातः प्रमाणत्वस्य प्रमाकरणत्वरूपत्वेन लक्षणलक्ष्यतावच्छे
दकयोरभेदापत्तिः॥ यथा च तयोर्भेदेऽपि अतिप्रसक्तत्वविवेचनीयमुपरिष्टात्॥ ननु प्रमाकरणमिति निर्विशेषप्रमायाः कर
णमित्युक्तौ किं प्रमाणं स्यादिति चेन्न॥ लक्षणवाक्याद्याशार्थस्य तोषलस्यैव लक्षणत्वेन प्रमानिरूपितकरणत्वस्य लक्षण
त्वलाभात् न दोषः॥ अप्रमायास्तु उरुत्वेऽपि विलक्षणं प्रमाकरत्वं यथा च करणमित्यर्थलाभे इतरभेदानुमाने हेतौ वै
यर्थ्यसंदेहो अलंतर्गुरुत्वाच्च॥ लक्षणवाक्यानामपि विषयीभूतार्थस्यैव लक्षणत्वे यत्नमेतत् प्रमानिरूपितकरणत्वस्य

स्वरूपप्रमाण्यादि

त.प्र. ८

वतामर्थं तस्यैव हेतुत्वप्रतिपादनेन तु प्रथमाक्षेपोऽवसित इति॥ वस्तुतस्तु प्रमाकरणाविनाभूतेनानवच्छिन्ननिरुक्ताकारणानवप्रमा
याः कारणमिति युक्तिः॥ प्रमाधाराणां धर्मादिलक्षणानां॥ यथा माहत्वात्वं गवात्वं तो गोरिति। साम्राज्यवत्वमायत्वं तरेवं गवत्वमा
वेमाहृत्याद्यावर्तिर्व्याप्नमिति साम्नात्वं गवत्वं विशिष्टो धर्मो लक्षणं नाद्यिताद्यान्ति त्वेमनिमकलन हृत्ति लक्षणाधारण
त्वं वत्वं गवत्वानाकृष्णकृष्णत्वात्वादयो लक्षणत्वं कारणायसंपन्नं न हृत्ति लक्ष्माकल्लानां यथा यथासान्निवेशः। नदिदम्
२५ र्कलक्षणानामेवयदानियात्समाहितैः यदैतिव्याप्य व्यापकसंभवेहिषाविनिशक्यिते। अलक्ष्ये लक्षणगमनमतिव्या
प्तिः। यथा शृंगवत्त्वं गोरिति। लक्ष्यैकदेशे लक्षणस्यावर्त्तनमव्याप्तिः। यथा कृष्णत्वं गोरिति। लक्ष्ये क्वाप्यवर्त्तनमसं
भवः। यथा एकशफत्वं गोरिति। इत्येवमादिष्विह क्रियाकारणकुठारादाविन व्याप्तेर्वारणाय मायदोषादानं। दोषदुष्टवस्तु
गोचरध्यानात्मकज्ञानकरणत्वादतिव्याप्तेः प्रवदोषादानं। प्रमाप्रमाणामित्युक्तौ च स्मृतिगोचरेऽव्याप्तिः। प्रमाकरण
स्त्र २ मिति विशिष्टमुपात्तं। ननु दोषदुष्टवस्तुगोचरे यागादिकहावित्रिमाजनेन तत्र प्रमाणव्यवहारोऽस्तु न समानवदुष्ट राम ८
तादृशापत्तेनादृशावगाहनापत्तिरितिवाच्यं। निद्राद्यकालघरितं लक्षणं येन तस्मिन्काले व्याप्तिः स्यात्॥ किंतु

स्वव्यधिकरणप्रकारावच्छिन्नाया या विषयता तन्निरूपकत्वं सर्वांशे प्रमात्वं

तद्दिग्दृष्टावस्मदाद्यनीयं ननु दोषस्य भ्रमादृशापाभिप्रायवन्नेतिति चेन्नापत्त्रधर्षणापदिनात्वं वस्तुतस्तु तत्त्रं भ्रमसंवेवाद
तन्नाशोपिन प्रमायाः जनकेनाविप्रमाणव्यवहारस्याविकारादतिव्याप्त्यापत्ताप्रपदस्यावशेषकत्वात्। दोषवशे
भ्रमाया अव्याप्तेः नान्यथाख्यातिस्वैवमानसंभवेन सर्वांशे भ्रमस्याविसिभवात्। यदि च सर्वं ज्ञानं धर्मिण्यभ्रांतं प्रकारे तु विपर्यय इति निमयमास्
तदंशेन भ्रमसंभवः। तथापि तत्तद्धर्मादावेव प्रमाणव्यवहारान्यतः शेषे इति भ्रमजनकेषा तत्त्वांशे प्रमाकरणत्वं कारणा
यत्तत्रैव प्रमात्वं लाभात्। प्रपदस्यावशेषकत्वात्। तान्यनुभवस्याविसंस्कारद्वारा स्मृतिहेतुज्ञानकरणत्वादतिव्याप्तेः प्रम
इमितिं॥ ननु विशिष्टबुद्धिं प्रतिविशेषणज्ञानस्य हेतुत्वात् प्रमाज्ञानेविना कथं प्रमाकरणत्वं ज्ञानानामित्यत आह॥ प्र
मा चेति॥ यद्वा ननु प्रमात्वं यथार्थज्ञानत्वं तथा च स्मृतेरपि प्रमात्वेन तत्करणेऽनुभवे प्रपदोपादानेऽप्यतिव्याप्तिरादृशस्य
मित्यत आह। प्रमा चेति॥ तथा चानुभवत्वघटितं प्रमात्वं तस्य च तावन्मात्रेण तत्करणेऽनुभवे ऽतिव्याप्तिरितिभावः।
स्मृत्यनुभवत्वस्यैव प्रमात्वमत एवाऽप्रमे अतिव्याप्तिः॥ यथार्थत्वस्यैव तद्घटितत्वेऽस्य तावतिव्याप्तिरनुभवपदोपादानं। न
नु प्रमात्वं स्यादनुभवत्वघटितत्वे प्रमाणाभावः॥ नचैवंस्मृतिनिरूपप्रमाकरणतयानुभवस्य प्रमाणतापत्तिरित्यत

मानमिति २

त.प्र. ९ ता। अनुमित्युपमितिशाब्दमित्यप्रमितिकारणत्वेन च प्रत्यक्षप्रमाणाविभजनान्नाधिक्यव्याघातो यो ऽस्य तत्राहाथवा हु
ग्गितीति मानमित्यादि। यथार्थानुभवो मानमनपेक्षतयेष्यते इति यावत्। भावत्वन्तु प्रमाणतेनिति: प्रमितित्रितियावता। अन
पेक्षतयाइत्यत्र प्रामाण्यपराधीनप्रामाण्यकतयास्मृतेः प्रमाणत्वं हि अनुभवप्रमाणत्वाधीनमिति स्मृतेरप्रमाणत्वमित्यर्थः
। यद्यपि स्वाधारण्यं सहकार्यसाधारणो वह्निर्गीः वां प्रमाजनयापि तत्र स्वेच प्रमाणत्वात्त्वमिति तदिनि यमेनानुभवसहकारिणामन
तः स्मृतिहेतुप्रमाजनकत्वादनुभवस्यप्रमाणानां नोपपत्तिः। तः स्मृतित्वात् व्यतिरेकेणानुभवत्वघटितं प्रमाणत्वमेव श्रूयंता
र्थं। एवं प्रत्यक्षोऽनिवेशपानुमितिमनिवेशप्रत्यक्षोपमितिशाब्दमित्यप्रमितिकारणत्वेनानुभवस्यानुमानेऽन्तर्भावाद पं६
न्तिर्विनिगमनाविरहादिति भावः। नद्दुशाति। तद्दृष्टीशोष्यकत्वेमनोऽन्यर्थः। नचैवं वह्निगुणजातयेजतयोः मो गुणजातयुजं च दृ
ष्टिविषयतत्त्रमेव प्रत्येऽशो वह्निलत्वावच्छेदेशोष्यकत्वस्य गुणौऽशे वह्निलप्रकारकत्वस्य सत्त्वोन्नव्याविप्रमाणत्वापत्तिरिति वा पं६
च्यं। तद्दृष्टिशेष्यकत्वावच्छेदेनतत्प्रकारकत्वस्यविवक्षितत्वात्। तद्वन्निष्ठविशेष्यताहूपितत्तन्निष्ठप्रकारताशा एम ९
लित्वमितितन्निष्कर्षः। तथा च तन्नात्संबंधावच्छिन्न तद्वन्निष्ठविशेष्यतानिरूपिततन्नात्संबंधावच्छिन्नतन्निष्ठप्रकारताशा

लिज्ञानत्वं तन्नात्संबंधावच्छिन्नतत्प्रकारकप्रमात्वमिति फलितं तन्नात्संबंधावच्छिन्नतद्वत्त्वनिवेशात्तेन संबंधेनातिद्वाद्यभावपविका
लिकादिसंबंधेन तद्वत्त्वस्य सत्वेपि न भ्रमत्वं। तथाप्रि सर्वेजनत एवं संयोगादि संबंधेनाजनतत्प्रकारकज्ञानस्यापि प्रमात्वापत्ति
रित्युभयत्र तन्नात्संबंधावच्छिन्नत्वनिवेशः। तस्यैव स्पष्टार्थमाह यत्रेति। यत्रेति। न द्युतिः जनतत्ववति तद्वत्ताद्विरजनतत्वावगाहि
स्वत्ले स्थले स्पष्टाशाल्लप्रदर्शितव्याप्तेननतद्भतीतस्यव्याप्रमितिसाहार्याद्युक्तोऽसुत्याद्विना। ननतद्भुतीतिः नो जनतत्वो वतीत्यर्थः। किं
तु जनतत्वाभाववति। जनतत्वावगाहित्वाद्भ्रम एवेति भावः। एतेन तदभाववति तत्प्रकारकं ज्ञानं भ्रम इति भ्रमलक्षणं संसूचितं। न
नु हस्तः कपिसंयोगीति ज्ञानस्य मूलावच्छेदेन तत्संयोगाभाववति संयोगप्रकारकत्वात् भ्रमत्वापत्तिरिति चेन्नान। प्रति योगिव्य
धिकरणतदभाववत्त्वस्य विवक्षितत्वात्। हस्ते संयोगाभावस्य न प्रतियोगिव्यधिकरणत्वमिति नानुपपत्तिः। नचैवं मूले वृक्षः
कपिसंयोगीति ज्ञानस्य भ्रमत्वानुपपत्तिरिति वाच्यं तत्त्वभावच्छेदकत्वेन तदवच्छिन्नत्वोगीकारात्। न तु संयोगांशेपीति। ननु त द्
ति तत्प्रकारकज्ञानत्वस्यैव प्रमात्वरूपत्वे संशयेऽपि व्याप्तिरतो निश्चयत्वघटितमेव तद्वाच्यमिति तात्पर्येणाशंकते न त्वेवमिति
एवं निश्चयत्वाघटितस्यैव प्रमात्वरूपत्वेऽजनतत्वांशे इति एकधर्मिकविरुद्धनानाकोटिकं ज्ञानं संशय इति जनतत्वसंशय

त.प्र.
१०

रजतत्वाजतत्वाभावौ को दौ तत्रारजतत्वाभाववति रजतत्वाभावप्रकारकत्वाभावादूरजतत्वाभावांशेऽप्रमात्वेपि रजतत्वव
ति रजतत्वावगाहित्वान्नरंशे प्रमात्वमिष्यत एवेति भावः। निश्चयत्वाघटितमेव प्रमात्वमित्यत्र प्राचीनसंमतिमाह
नह्वनीतिरस्य त्रिविधाव्यवच्छेदनायानुभवत्वघटितं तं परमं गीकुर्वंति। ननु संशयव्यावर्त्तनायनिश्चयत्वघटितं तस्मा पाति भावांश
कतो शात्वेति॥ कचिन्नान्वितेव पाठः। कपिसंयोगाद्यहिते वृक्षे कपिसंयोगवत्ताभावोपि प्रमात्वसंभवइत्यतः कपिसंयोगव
ति वृक्षे इति। नत्वारापि मूलावच्छेदेनकपिसंयोगमत्वे प्रमात्वेइष्टापत्तिरतः शाखावच्छेदेनेति सावधारणांशाखावच्छेदेने
व न तु मूलावच्छेदेनेत्यर्थः। वृक्षः कपिसंयोगीति प्रत्ययस्य प्रमात्वेऽविवादान्मूलइति। मूलावच्छेदेनांतनोगगनादिसं
योगस्यसत्वान्मूले वृक्षः संयोगीति प्रत्ययस्य प्रमात्वं सर्वसंमतमेवेत्यनन्यथाह कपिसंयोगीति। अवच्छेदकत्वप्रत्ययस्तु
कपिसंयोगावच्छेदकत्वप्रत्ययस्तु न तथा। न प्रमा। तस्य मूलस्य तदनवच्छेदकत्वोत् कपिसंयोगवति वृक्षे कपिसंयोगप्र
कारकत्वात् कपिसंयोगांशे प्रमात्वमेवा अवच्छेदकत्वांशेति अवच्छेदकत्वप्रकारकत्वाभावांश तत तदंशे प्रमात्वमित्य एव
भाव२ र्थः। न तु तस्य तिद्भिन्नज्ञानत्वमनुभवत्वमित्यत्र संस्कारजत्वमेव तस्य तिलं वा यं। नकरप्रत्यभिज्ञानतिप्रसक्त म १०

न्यैशा न१

३कपिसंयोगानवच्छेदकत्वात्३

नुगतं तद्धर्मवत्वं संस्कारत्वेन च तज्जन्यत्वं तस्य तिलत्वस्य जातित्वमंततः संस्कारत्वेन जनकतावच्छेदकतया जातित्वसंभवात् तत्तस्यैव जाति
त्वेन संस्कारजन्यत्वघटितत्वाद्गुरुत्वं लक्षणांतरमाह यद्वेत्यस्य तिलं जातिः तदवच्छिन्नप्रतियोगिताकभेदस्यैव निवेशा
न्नागौरवमिति विभाव्यते तदानुभवत्वमपि जातिरलहिरिव रुलमेव च लक्षणमास्तां कुतस्त्रैतावत्कुरुत्वात् यस्यापायेन
हा। जातिविशेषो वेति। ननु अत्र किं मानमत आह। अनुभवामीति। अनुगतप्रतीतेरनुगतधर्मं विनानुपपत्तेरनुगतो
धर्मोऽनुभवत्वाख्यः। तस्य चोपाधित्वे गौरवात् जातित्वमेव कल्प्यत इति भावः। अभावत्वमनुगतप्रतीत्या अभावत्वस्य जा
तिसिद्धापत्तिरतोवाधकं विनेति। तत्र जातिबाधकसत्वेपि सत्वाप्रमितत्वात्तत्कल्पमवेत तस्यैव जातित्वाहितिभावः। तथा चोक्तं
व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः। रूपहानिरसंबंधो जातिबाधकसंग्रहः॥ व्यक्तेरभेदः आकाशव्यक्तेरेकत्वे
यथा काशत्वादिरतुल्यत्वं अनूनानतिरिक्तव्यक्तिकत्वं यथा घटत्वकलशत्वयोः। परस्परात्यंताभावसमानाधिकर
णयोर्धर्मयोरेकत्र समावेशः संकरः। यथा भूतत्वमूर्त्तत्वादि अनवस्था यथा जातित्वादि। विशेषत्व जातित्वे कौ
रूपहानिः रूपस्य लक्षणस्य सामान्यमपि न्वलेसतिसमवेतत्वेव सतिसामान्याहितत्वरूपं वा विशेषलक्षणस्य हानिः वि

उपाधि

४उद्देश्यतावच्छेदकसमानाधिकरणभेदप्रति
४योगितावच्छिन्नउद्देश्यतावच्छेदकवत्त्वं अनेकत्वं तद्भिन्नत्वं एकत्वं

४ त्वामनुभवामीति प्रत्यक्षविषय इति न तावत्प्रत्यक्षविषयतया ४
प्रत्यक्षादि ४

त.प्र. शेषतज्जातीयविनाश्यावर्त्तकत्वात्स्वतनएवव्याहन्तत्वहूपविशेषस्वरूपहानिरितिभावार्थः॥ अत्रमते बाधः अत्रमते तेनत्वं यथा
११ कंबुग्रीवादिमत्त्वादिरूपेणकिंचित्तुरूपं तोव्याभिचाराणामपि विशिष्टवैशिष्ट्यं वा तानुभवत्वस्यैवविशेषणतावच्छे
दकप्रकारकनिर्णयजन्यतावच्छेदकत्वमनुमेयं तथा च तज्जन्यतावच्छेदकफलोपि प्रविष्टत्वेनानुभवत्वं जातिः॥ नाहुः॥ अ
नुभवत्वमनुमितिशाब्दबोधानंतरं त्वामहमनुभवामीति प्रतीत्यापत्तेः साक्षात्कारत्वरूपमुख्यानुभवत्वसाधारणं
त्रि५ नास्तिसिद्धिरनुमितिविशेषणतावच्छेदकनिर्णयजन्यतावच्छेदकतया नास्तिसिद्धिरिति। तद्यथा नानिश्चयार्थजन्मजन्यानुभवत्व
मेवकार्यतावच्छेदकमनुपानंतर्भावात्स्मृतिसंस्कारजन्यत्वं प्रतियोगित्वं प्रागभावप्रतियोगित्वं कालिकसंबंधेन घटादिमत्त्वेन नि
[illegible]कुसुमशब्दप्रत्यक्षजन्यप्रत्यक्षमात्रेप्रमितिवैजात्यमेवकार्यतावच्छेदकं नवा तथाचकुतः सकलप्रत्यक्षसाधारणा
त्या२ नुभवत्वमनिसिद्धिरित्यत आह स्ववृत्तित्वासमवायिकारणत्वघटकं करणत्वं लक्षयति। व्यापाराहकमिति। कपालेति। न त्म
लि२ चाप्यसाधारणत्वस्य हि भिन्नभावः॥ असाधारणेति असाधारणत्वं च कार्यत्वावच्छेदकनिरूपितकारणता ११
कार्यत्वं दृश्यरत्नानमनू पारतन्त्र्याविधया कार्यतावच्छिन्नप्रत्येकहेतुत्वाच्चानि व्याप्तिरिति भावः। ननु कार्यतावच्छि

न्नकार्यतानिरूपितकारणतावच्छेदकत्वं नतान तथासति कार्यमात्रं प्रति कालस्य हेतुत्वेन कालोपाधिविधया घटत्वादिना
मपि कार्यमात्रे प्रति हेतुतापत्तेः करणत्वापत्तिरिति ध्येयं॥ ननु फलायोगव्यवच्छिन्नं कारणं करणं अत एव ता
नैतानकारणानां व्यापारवत्त्वेन फलायोगव्यवच्छेदाभावादित्याशयेनाशंकते नन्वेवमिति। [illegible]॥ एवंविधकरणत्वस्य
करणतावच्छेदकत्वादिति। तत्र ज्ञानत्वावच्छिन्नं प्रति असाधारणकारणत्वाच्छेदकत्वमपि दूषयति। तज्ज्ञानत्वे सतीति।
तज्ज्ञानत्वस्य फलेपि सत्त्वात् तज्ज्ञानजनक इति तज्ज्ञानजनकत्वस्य वेश्याहारादावपि सत्त्वात् तज्ज्ञानत्वे सतीति। स्वा
देरेवेति। तद्धर्मविरहे फलायोगव्यवच्छेदस्यासंभवित्वात् सहकारिसमवधाने फलायोगव्यवच्छेदस्य चात्र व्यापि स
त्वेनत्वमते प्रयोगादिति भावः। नन्वेकस्यैव कर्तृत्वकरणत्वस्वीकारे कर्त्रीकरणमिति नानाविधव्यवहारोनुपपन्नः
~~व्यवहर्त्तव्यभेदस्यैव व्यवहारभेदनियामकत्वादित्यत आह तज्ज्ञानत्वावच्छिन्नं प्रति असाधारणत्वेन हेतुत्वमात्मनस्तथाचेति~~
~~दकफलोपि प्रविष्टत्वेपि कार्यतावच्छेदकतावच्छेदकस्य विरूपणात्मन एव परव्यापारेणानुभवत्वेनाच्छेदितिनोव्यवहारेपि~~
~~ति। तज्जातव्याप्तिनिरूपणमति धर्मस्यापि कार्यतावच्छेदकत्वेपि स्मृतिज्ञानत्वावच्छिन्नं प्रत्येवात्मत्वेन हेतुत्वमानत्वकारणता~~

त.प्र.
१२

~~यत्र तत्रस्य कर्त्ताहिति। वार्त्तिकस्य मते प्रत्यक्षस्यैव प्रमाणत्वात् महानां मते नु पलब्धेरपि प्रमाणत्वात् त्रिप्रमाणत्वादाह~~
~~चतुर्विधमिति। तत्रेति। चतुर्विधप्रमाणमध्ये इत्यर्थः। तत्र प्रत्यक्षेति हृदं प्रत्यक्षप्रमाणं लक्षयति। साक्षात्कारे~~
~~तिसाक्षात्कारोति~~ अनुमानाहरति व्याप्तिः अहेतुव्याधीनामिति। तथा चोपदेशे पक्षं कोष्णाद्येसे कारणहितिन्यायेन यत्र
हर्नेव्याप्तेहेति यत्र वह्नेर्व्यापितावच्छेदकभेदादेव व्यवहाराभेदः यथा घटरूपत्व वह्नेर्व्याप्तेदेपि घटत्वरूपत्वादिरूप यत्र वह्ने
व्यापितावच्छेदकभेदेहेरूघटोद्भवं इत्यादिर्व्यवहाराभेदः। तथैव पाचकपाठकादिर्व्यवहाराभेदोपीति भावः। अतएवेति। एकस्मै
एककर्तृत्वकारणत्वस्वीकारादेवेत्यर्थः। अत एवात्मनः कारणत्वस्वीकारादेवान्तनीयेति। तत्तीयाः कारणत्वार्थकत्वा
दिति भावः। अणीत्यणीभवता संभवनंतह्नीजंतत् सर्वं आरंडोपाधेरनुगतप्रतीतिविषयत्वे सखंडोपाधेरूढस्यैवेति।
नचकर्त्रादि व्याहन्तकारणत्वनिर्वचनानुपपत्त्या अखंडोपाधिरूपत्वमेव कारणत्वमिति वाच्यं। तस्य तत्तद्धारणेपर्याप्ततेः व्य
वहारभेदस्य च वह्नेर्व्यापितावच्छेदकभेदादेव तस्य भाग अनुपपत्तेरिति। नन्वेवमपि ... प्रमाणलक्षणान्तिरितिचेन्न। अनुम
त्वव्याप्यजातिमत्त्वावच्छिन्नप्रमाजनकत्वज्ञानहितकारणत्वाश्रलक्षणत्वात्त्वेसति व्यापारवत्त्वस्यैव प्रमाणलक्षणत्वेनाननित

राम
१२

हतेऽभवात्तदनुमतमितिअवाप्तुपलब्ध्याल्लोकजन्यतावच्छेदककल्पाहल्लोकेऽतिव्याप्तेर्ज्ञानत्वावच्छिन्नेत्यत्रावच्छेदकतापर्याप्ति
निवेश आवश्यकः। इत्थं च जन्यज्ञानत्वावच्छिन्नं प्रति आत्मत्वेन हेतुतया ज्ञानत्वजातेरवच्छेदककोटिप्रविष्टत्वेऽपि कार्यतावच्छे
दकतापर्याप्त्यधिकरणत्वाभावान्नतत्र एवकारेऽलोअनुमत्वव्याप्तेर्नोपोदेयमिति। तत्रातथापि निस्वन्ति धर्मस्यापिका
र्यतावच्छेदकत्वोपपत्तेज्ञानत्वावच्छिन्नं प्रत्येवात्मत्वेन हेतुतया ज्ञानत्वजातेर्यत्र हादशपकल्पादिति। वार्त्तिकस्य मते प्रत्य
स्यैव प्रमाणत्वात् महानां मते नु पलब्धेरपि प्रमाणत्वात् त्रिप्रमाणत्वादाह चतुर्विधमिति। तत्रेति। चतुर्विधप्रमाणमध्ये इत्य
र्थः। तत्र प्रत्यक्षेति हृदं प्रत्यक्षप्रमाणं लक्षयति। साक्षात्कारेति। साक्षात्कारोति अनुमानाहरति व्याप्तिकारणयोर्गा
कारजेतु के साक्षात्कारत्वं प्रमेति अनुमानसा हत्कारणेन तु कारण तेनोहवेति। इत्थं साक्षात्कारो मातिप्रतीतिः
इन्द्रियेति। [illegible] तथा च ... विशिष्टिरिति भावः। ज्ञानमात्रेऽपीति। तथा च मनो हवेन्द्रियजन्यत्वस्य अनु
मित्या हयविसत्वेन तत्रापि साक्षात्कारत्वमतिप्रसङ्गपत्तेरिति भावः। ननु इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्य
तावविषयः। मनसत्वमानसज्ञानप्रत्येन्द्रियत्वेन हेतुत्वं अनुमित्यादौ प्रति तु मनस्त्वेन मनसो हारेन्द्रियाप्रतीताति

कोरर

न.प्र. १३ वेति॥ इंद्रियत्वाप्रतीतावित्यर्थः॥ तथा चेंद्रियत्वज्ञानं विना तद्घटितधर्मज्ञानाभावान्न तादृशधर्मस्य विषयत्वमिति १०/३(A)
भावः। वस्तुतस्तु साक्षात्कारत्वरूपजात्यभावे इंद्रियत्वेन कार्यकारणभावासंभवितया इंद्रियत्वेनेंद्रियजन्यत्वस्य साक्षा ज्ञान
त्कारत्वरूपत्वासंभवान्नेत्थमवतारणीयं परं तु ननु इंद्रियानिरूपितविषयतासंबंधावच्छिन्नजन्यताशालिज्ञानत्वमेवा
10/3(A) नुमित्यादिव्यावृत्तं तद्विषयत्वमस्त्वित्यत आह इंद्रियेति। इंद्रियाज्ञाने इत्यर्थः तथा प्रतीतेः साक्षात्करोमीति प्रतीतेः। एतेन ज्ञा
नाकारणकेऽपीने प्रत्यक्षमितत्वमपि निरस्तं। तस्यानेयितत्वप्रतीतेर्जायमानत्वात्। अवच्छेदकत्वमपि च स्पष्टत्वादिजातिरे
व कथं नात्मविषयत्वमत आह नापीति। अननुगमकत्वादिति। अनुगतप्रतीतेश्चानुगतधर्मं विनाऽनुपपत्तेरिति
भावः॥ ननु प्रतीतिमात्रानेतां साक्षात्करोमीत्यप्रतीतेः लौकिकत्वविषयताया अवच्छेदकत्वेनावश्यकत्वान्न लौकिकवि
षयताशालिज्ञानत्वमेव साक्षात्करोमीति प्रतीतिविषयोऽस्त्व अननुगतप्रतीतेरेव जातिसिद्धौ तु भूर्विभुरित्याद्यनुगताका
रप्रतीत्या विभुत्वरूपजातिसिद्धिः स्यात्। किंतु कारणतावच्छेदकतया कार्यतावच्छेदकतया वा जातिसिद्धिः। न चात्र राम
तत्संभवतीति न चेंद्रियत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया तत्सिद्धिरिति वाच्यं॥ इंद्रियत्वस्यैव्याभावा १३

त्॥ इंद्रियनिष्ठैकफलेष्वेव ज्ञानत्वं स्वीकृत्य विजातीयैकत्वरूपस्य तत्संभवेऽपि कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदक
त्वेन साक्षात्कारत्वस्यातिप्रसक्तत्वेन तया जन्यतावच्छेदकत्वासंभवात्। जन्यत्वनिवेशे च जन्यत्वस्य ध्वंसप्रतियोगित्वप्रागा
भावप्रतियोगित्वादिविकल्पग्रासेन निर्वक्तुमशक्यतया जन्यसाक्षात्कारमात्रवृत्तिवैजात्यस्यावश्यकत्वात् तस्यैव जन्यतावच्छे
दकत्वावश्यकतया कृप्तस्त्वकोटिप्रविष्टतया साक्षात्कारत्वरूपजातिसिद्धिः। एवं चाक्षुषस्पार्शनादेर्विशिष्य वस्तुत इ
ंद्रियहेतुत्वावश्यकतया तादृशसामान्यकार्यकारणभावे मानाभावात् तत्राह यद्वेति जन्मधीमात्रेति॥ जन्यधीत्व
जन्यमात्रवृत्तिर्या जातिस्तदवच्छिन्नज्ञानत्वे साक्षात्कारत्वमित्यर्थः। लक्ष्ये लक्षणगमनमुपपादयति। भवतीति। अनुमितित्वादि
न्यादिष्यदृष्टमितित्वव्यापकत्वादित्याशयः। तत्राहि जन्यज्ञाने व्याप्तिज्ञाने अनुमितित्वमिति देशवाक्यार्थज्ञाने पदज्ञानादित्वेन न मनु
मित्यादित्वमात्रे अनुमितित्वादिकेच्छिन्नज्ञानत्वे साक्षात्कार इत्यर्थः। अत्र च ज्ञानत्वे साक्षात्कारत्वमिति तु व्याप्त्यनुमित्यादावति
व्याप्तिरतः अर्थाजातिसूक्ष्मज्ञानत्वे साक्षात्कारत्वमिति तत्त्वावसेयं। ज्ञानत्वादि जातेरवतन्त्रसत्वादतो जन्यधीजन्य
मात्रवृत्तीति। जातिविशेषणं। ज्ञानत्वस्य च जन्यधीजन्यभिन्ने ईश्वरसाक्षात्कारे निर्विकल्पके च सत्वान्न तन्मात्रवृत्ति

त.प्र. १४ त्वमिति नासंभवः। जन्यधीजन्यप्रत्यक्षावयवितया ज्ञानत्वादेर्जन्यधीजन्यसविकल्पकवृत्तित्वात् तो मात्रेति जन्यधी
जन्यमित्यादौ वृत्तित्वे सति जन्यधीजन्यवृत्तित्वे यत् तन्मात्रवृत्तित्वं। चाक्षुषत्वादिजातेरपि धीजन्यमात्रवृत्तित्वाद् व्या
प्तिः। अतः प्रथमजन्यज्ञानं। तस्य च जन्यज्ञानाजन्यनिर्विकल्पकवृत्तित्वात् तन्मात्रवृत्तित्वं जन्यजन्यमात्रवृत्तिप्रत्यु
क्तावयविनिर्विकल्पकस्य जन्यप्रत्यक्षादिजन्यत्वेन चाक्षुषत्वादेर्जन्यजन्यमात्रवृत्तित्वाद् व्याप्तिरतो धीचरीकादानं जन्य
धीमात्रवृत्तित्वमुक्तावयविचाक्षुषत्वस्य जन्यज्ञानमात्रवृत्तित्वाद् नो हि तृतीय जन्यपदोपादानं जन्यमात्रवृत्तित्वमुक्ता
वयवितयोपात्ते जन्यधीति। धीमात्रवृत्तित्वमुक्ते ज्ञानत्वादिकमादायासंभव इति नित्यमुदितं नयुक्तं। जन्यधीजन्यमात्रवृ
त्तिधर्मप्रसमवायित्वमुक्तौ सविकल्पकत्वस्य तन्मात्रवृत्तित्वेनाव्याप्तिरतो जातिपदं। सविकल्पकत्वं तु न जातिः। चा
क्षुषत्वादिना संकरप्रसंगात्। समवायसंबंधावच्छिन्नजातिप्रसमत्वं चात्र बोध्यं। अन्यथा कालिकादिसंबंधेनानुमि
तित्वादेरपि प्रत्यक्षादौ सत्त्वेनासंभवापत्तेः। एतदर्थमेव जातिपदं। घटादावतिव्याप्तिवारणाय ज्ञानत्वमिति ननु उपा राम
दानप्रत्यक्षस्य कार्यमात्रे हेतुतया कपालविषयकोपादानप्रत्यक्षजन्यज्ञानजन्यमात्रवृत्तिघटत्वादिजातिसत्त्वा १५

न्नज्ञानातिव्याप्तिरिति चेन्न। सर्वोऽप्येकुलालोऽपीत्युत्पन्नोऽपि घटोऽनादिनाशकपालप्रत्यक्षस्य जन्यत्वाद् घटत्वा
देर्जन्यधीजन्यमात्रवृत्तित्वाभावात् घटादावतिव्याप्तिसंभवात्। सामान्यादावतिव्याप्तिसंभवो [illegible] निदिध्यासनेत्युपल
क्षणं। काशीमरणादृष्टेनापि कोऽपदेशजन्यज्ञानेनापि दूरत्वात्। निदिध्यासनेनादिना जन्यधीजन्यमात्रवृत्तित्वं स्पष्टमिति तत्वमनु
तत्वसाक्षात्कारत्वं श्रवणादिप्रयोज्यात्मविषयकशाब्दादिभिन्नत्वप्रकारकसाक्षात्कारत्वं तत्तु विशिष्टस्यानात्तरेकात्मा
साक्षात्कारत्वं श्रवणेऽसंभवजन्यज्ञानजन्यमात्रवृत्तिजातित्वं व्याप्तिरित्याह मोक्षेतिति यावन्मुक्तिः तावच्छिन्नकार्यतानिरू
पितकारणतावच्छेदकतयासिद्धस्य तत्त्वज्ञानवृत्तित्वे ज्ञानस्य निदिध्यासनादिजन्यमात्रवृत्तित्वात् तच्छून्यत्वाभावेना
व्याप्तिरिति भावः। इदमुपलक्षणं। आत्मत्वप्रकारकज्ञानवृत्तिमात्रवृत्तित्वेऽपि फलावश्यंभावनियमवद्वर्णाभ्याभि
व्याप्ते जन्यधीजन्यमात्रवृत्तित्वा [illegible] मानसाहं जीविनामावादनुमितौ स्वतिव्याप्तिः। नचेतादृशज्ञानप्र
सिद्धिः। ईश्वरज्ञाने प्रमत्वतावच्छेदकशाब्दत्वजातेर्वैजात्यरूपत्वादित्यत आह मानसत्वं वेति। नुमानसत्वस्य जातित्वे प्रमाणाभाव
[illegible] इत्यत आह ज्ञानेति स्पष्टमिति। आत्ममानसत्वावच्छिन्नप्रतिविज्ञानी
३ x तिजातिविशेषणमावश्यकमिति ध्येयं। ननु मानसत्वं च मनोजन्यत्वं तच्चानुमित्यादेरपि मानसत्वापत्ति x ३

१७ नास्तिकास्त्विति ॥ १

२ अभावस्य तन्मते तुच्छः अलीक इति यावत् ॥ तथा चाभावरूपघटसत्त्वस्य अलीकस्य विशिष्टज्ञाने ३

त.प्र. चमनःसंयोगत्वेन हेतुतया तज्जन्यतावच्छेदकत्वेन मानसत्वजातिसिद्धिरिति भावः॥ वैशिष्ट्यानवगाहि ज्ञानं निर्विकल्पकं

१५ तदेव साक्षात्कारः॥ अपदं द्वितीयवैशिष्ट्यविषयकत्व इति शेषः॥ घटत्वादीत्यादि॥ लोकेति॥ तन्मते अनुगतधर्मो घटत्वादिर्न ग्राह

त्विहएवं व्याप्तिरतो नाभावः॥ अभावानामहं सन्तोऽसंबंधाभावादिविशेषपलीकस्य अप्रसिद्धविषयकं यज्ज्ञानं तन्मत

ति सविकल्पकं ज्ञानं भ्रमः॥ निर्विकल्पके च घटत्वादेर्भानात्पारमार्थिकविषयकत्वेन तत्रैव साक्षात्कारत्वप्रमात्वे अर्थतः सेव पारमार्थिकविषयक

अभ्युपगन्तव्ये इति भावः॥ बाधकं विनेति॥ विषयविसंवादस्य बाधप्रमात्वे बाधकः॥ यथा शुक्तौ रजतत्वस्य प्रत्यक्षे तेन घटत्वस्यापि

संवादक एवेति भावः॥ ननु विषयविसंवादस्य बाधकत्वं न ब्रूमः अपि त्वलीकविषयकत्वमेव ततस्तदाह॥ नचेति॥ अलीकत्वमिति

रीति॥ अभावस्यापि घटत्वस्य हार्थवदनुभूयमानतयाऽलीकत्वमसिद्धमिति कुतः अनवगाहित्वेयघटत्वस्यालीकत्वं प्रक

घटव्याप्तिरिति तत्र घटभिन्नपार्श्वे विद्यमानप्रतियोगिकभेदस्य पटेऽपि सत्त्वान्न घटभिन्न [illegible] ग्राह्यत्वावच्छिन्नभेदकूटस्य त.प्र.

वघटत्वसंवाद्यो॥ तथा च यावत्प्रतियोगिज्ञानाभावात् घटत्वबुद्धेरहेतुत्वस्यात्॥ यदि चाभावत्वेनाभावज्ञाने एव प्रतियोगिज्ञा १५

नापेक्षा॥ अत्र हएवं घटत्वज्ञानाच्चानुपपत्तिरिति विभावयेत् तथापि घटत्वं [illegible] नित्यत्वे हेतूपपत्तिः॥ तत्र घटत्वत्वेन घ

टत्वस्य भानात्तस्य च भवन्मते यावत्प्रतियोगिज्ञानं विनाऽसंभवादिति॥ किं वा न ग्राह्यमिति भिन्नस्यैव घटत्वादेरूपत्वं भान्ताभा

वत्वमिति कुतो अलीकत्वे भावत्वेनेति भावः॥ महदादिविषयान्तर्निपको हेतुतत्त्वसाक्षात्कारस्य तदानैव हमविलेन साक्षात्का

रस्यैकविधत्वमेवांगीक्रियत इत्यत आह॥ नन्वेवं निराकर्तुमाह॥ नवेति॥ कार्यमात्रं प्रतु कारणप्रत्यक्षस्य हेतुतया प्रमाणकादिह

कोपादानप्रत्यक्षं विना घटत्वकादिहएवकार्यस्यानुपपत्त्या ईश्वरोऽवश्यमेतत्कर्त्तव्यः॥ तथा च तत्तत्ज्ञानसत्वे नेदं विध्वंसेन नत्स्येति

भावः॥ हेतुविध्वंसेत विवक्षितोऽस्तीति॥ नित्यत्वात्ति नानित्यत्वं प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं॥ तस्येतन्निवेशात्ध्वं

सेऽतिव्याप्तिः प्रागभावेऽतिव्याप्तिवारणाय विशेष्यदलनिवेशः॥ अनित्यत्वं च प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगि

त्वं वा अभावत्वे इति भावः एवं धर्मसृष्टयर्थः॥ अमहादि साक्षात्कारेति यावत्॥ तत्रो निर्विकल्पकसविकल्पकयोर्मध्ये वैशि

ष्ट्यानवगाहीति॥ वैशिष्ट्यविषयताशून्यज्ञानत्वमित्यर्थः निर्विकल्पके विशेषणज्ञानं तेन तदर्थघटत्वविषयकत्वमावश्य

कं॥ व्याप्तिभानमेतावज्जातिभानासंभवान्नतादिविषयकत्वमवितस्यांगीक्रियते वैशिष्ट्यविषयकत्वेतु न किंचित्साधकमिति

वैशिष्ट्यानवगाहित्वमत्र तन्मते सविकल्पकेऽपि वैशिष्ट्यस्याविषयत्वात्तन्मते जातिर्वा नास्तीति भावः॥ नास्तिं हाकारक ज्ञानत्वीको

त.प्र. हेतुत्वं त्रिरूपितवैशिष्ट्याविषयताशून्यज्ञानत्वं तन्निर्विकल्पकत्वमिति ध्येयं। ननु चक्षुःसंयोगाच्चक्षुःसंयुक्तसमवायादि
१६ रूपकारणबलात् घटघटत्वयोर्भानवच्चक्षुःसंबद्धविशेषणताद्रूपकारणबलात्तत्संबन्धस्यापि भाने बाधकाभावः। प्र
तिबध्यप्रतिबंधकभावकल्पने च गौरवं तथा चेदंत्वसामान्यसंबन्धवत्त्वाभिमतं तन्न्याह निष्प्रकारकं वेति निष्प्रकारकं वेत्यर्थः।
विशिष्टत्वेनैव चाह। वस्तुतस्तु वैशिष्ट्यानवगाहित्वं तस्य संसर्गानवगाहि यद्वैशिष्ट्यानवगाहि तदर्थं वैशिष्ट्यानिरूपितसांसर्गिकविष
यताशून्यत्वं तत्त्वमिति तु निष्कर्षः। ननु प्रकारतासामान्यशून्यत्वं विशेष्यतासामान्यशून्यत्वमपि तस्य लक्षणं कर्तुं शक्यतया वेति न
कथं नोक्तमिति चेत्तदुपायानन्तर्येवाह निष्प्रकारकं वेति निष्प्रकारकं निर्विशेष्यकं वेत्यर्थः। तत्कारणत्वाद्यव्यवहितोत्तरविकल्पं
दृष्टव्यमिति पुनर्निर्विकल्पकः कथं ज्ञायतेऽत एव घट इति ज्ञानोत्तरं घटत्वेन ज्ञानान्तरं चानुव्यवसायः। तत्र च वैशिष्ट्यस्य तत्ता
र्थत्वे घटत्वविशिष्टविषयकज्ञानवानिति प्रकारत्वस्य तत्तार्थत्वे घटत्वप्रकारकज्ञानवानित्याकारस्तथा च तादृशानुव्य
वसायबलादेव विकल्पकस्य प्रत्यक्षसिद्धत्वेऽपि निर्विकल्पकस्यानुव्यवसायाप्रत्यक्षत्वाभावात् तत्र प्रमाणं संप्रमाणतो नाय राम
नुमानमप्रयोजकत्वादिति मीमांसकमतं दूषयितुं हिरण्यरूपांकनेनाहेति। निर्विकल्पकं चेत्यर्थः। प्रत्यक्षासिद्धमनुव्यव १६

साधात्मकप्रत्यक्षस्याप्रत्यक्षमिति ताम्यं। अस्य प्रत्यक्षमादाविति नैयायिकैरिति शेषः। अनुमेयं अनुमानगम्यं तत्त्वायं घट
इत्याकारकः ज्ञानं घटत्वविशिष्टसाक्षात्काराः ज्ञानं घटत्वेज्ञानपूर्वकः। ज्ञानं घटत्वविशिष्टज्ञानत्वात् यद्यद्विशिष्टज्ञानं
भवति तत्तद्विशेषणज्ञानपूर्वकं भवतीति सामान्यमनुमानव्याप्तौ दंडाद्युरूपदृष्टान्त इति प्रत्यक्षे दृष्टान्तः। ननु च कार्यकारणभावादिरूप
पानुकूलतर्काभावादप्रयोजकत्वमित्यतस्तत्त्वाह तथा हि त्यादि। जन्मेति। ज्ञानं नाद्विशिष्टज्ञानत्वावच्छिन्नं प्रतिज्ञानं नाद्वि
शेषणज्ञानत्वेन हेतुत्वमिति कार्यकारणभावावगाहकानुकूलतर्क इति भावः। घटत्वज्ञानाद्विविशिष्टज्ञानकारणापत्तेस्तत्त्व
ते न भाव्यः। नित्यव्यावर्तनाय च कार्यतावच्छेदके जन्यत्वनिवेशः। नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति निय
मात्कारणतावच्छेदके विजन्यत्वनिवेशः। वस्तुतस्तु सामान्यादिविकरणप्रत्यासत्तिजन्यस्य हेतुत्वबोधनाय कारणतावच्छेद
के जन्यत्वनिवेशनामिति ध्येयं। निर्विवादमिति। यथावच्च न विवादस्तथोपपादयिष्यते। तथा च कार्यकारणभावग्रहणानुकू
लतर्कसत्त्वान्नाप्रयोजकत्वमनुमानस्येति भावः। पक्षे हेतुं संगमयति। भवति चेति। धारावाहिकस्थले द्वितीयादिविशिष्ट
ज्ञानस्य पूर्वपूर्वविशिष्टज्ञानजन्यत्वसंभवात्तन्निर्विकल्पकासिद्धिरत आहोत्पत्तिकमिति। तथापि घटत्वविशिष्टज्ञा

त.प्र. नेपि। ननु घटत्वप्रकारकज्ञानमेवास्तां किं पदाभिलापाशंक्यनिषेधेनेति तदानीं। प्राथमिक घटत्वविशिष्टज्ञाना
१७ पूर्वं। ज्ञानाभावादिति। तथा च विशेषणज्ञानं विना तस्य न विशिष्टज्ञानत्वमिति भावः। तत इति। विशेषणज्ञानाभावेन
तस्य विशिष्टज्ञानत्वाभावादित्यर्थः। तादृशीति। घटत्वविषयकं ज्ञानमित्यर्थः। ननु वैशिष्ट्यानवगाहि घटत्वविषय
कज्ञानमसिद्धमविवादेन निर्विकल्पकमित्यविशिष्टेत्यत आह। तदेव चेति। अनन्यथासिद्धपूर्ववृत्तिनियतकारणत्वात् तज्ज
न्मं तत्र घटत्वविशिष्टज्ञानस्य पूर्ववृत्तित्वात् तदेव कारणमस्त्विति पाशंकते। न चेति। अव्यवहितेति। न हि एवं वृत्ति
त्वमात्रं कारणत्वं घटकमपि तु अव्यवहितपूर्ववृत्तित्वं तच्च न तत्रेति भावः। कार्यमात्रेप्रतिबन्धत्वेन हेतुत्वाद्दि
च्छापत्तानस्येव हेतुत्वमस्त्विति पाशंकते। न चेति। तज्जनकं। घटत्वविशिष्टज्ञानजनकं। सामानाधिकरण्येनेति। एक
स्य हेतुज्ञाने पुरुषो नास्य हेतुर्विशिष्टज्ञानं कारणतावच्छेदकसंबंधेन तादृशविशिष्टबुद्धिं प्रति समवायसंबंधेन तादृशि
षणज्ञानस्य हेतुत्वमिति सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वेन भाव्यं तत्र ज्ञानस्य न हेतुत्वमिति भावः। व्यधिकरण राम १७
त्वात्। अस्मदादेः घटत्वविशिष्टज्ञानव्यधिकरणत्वात् तत्र कारणमिति। घटत्वविशिष्टानुभवे कारणमित्यर्थः। त

देव विशिष्टज्ञानात्मकं स्मरणमेव। पूर्वानुभवस्य समवायसंबंधेन स्मरणापूर्वमसत्त्वाद्विशिष्टज्ञानत्वस्य विशेषणज्ञा
नकार्यतानवच्छेदकत्वेन विशिष्टानुभवत्वमेव कार्यतावच्छेदकं वाच्यमित्याह। विशिष्टानुभव इत्यादिना। न तु स्मरणेऽपीति
तेनाविना। विशेषणज्ञानेन विना। तदुपपत्तेरिति। विशिष्टस्मरणोपपत्तेरित्यर्थः। कदाचिद्दंडज्ञानात्मसंस्काराभावेन
दंडविशिष्टस्मरणाभावात्तत्र विशेषणज्ञानहेतुत्वस्य निरर्थकत्वात्। पूर्वानुभवस्यापि नष्टत्वात् विशेषणज्ञानस्य स्म
रणाजनकत्वासंभवाच्चेति भावः। ननु पूर्वानुभवस्य नष्टत्वात् स्मरणाजनकत्वासंभवेऽपि विशिष्टस्मरणमेव स्मरणपूर्वकं कल्प
नीयमित्यत आह। अन्यथेति। अन्यथा विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानस्य हेतुत्वे पूर्वमनुभवस्यासत्त्वात् तज्जनकमपि
स्मरणमेवाभ्युपेयं तत्रापि स्मरणान्तरमित्यनवस्थेत्यर्थः। ननु अनुभवत्वजातौ मानाभावेन स्मृतिभिन्नज्ञानत्वस्य च तत्त्वे वि
शेषे गौरवात् विशिष्टज्ञानमात्रे विशेषणज्ञानस्य हेतुत्वेन विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानं हेतुः। न चानवस्थानं स
र्वे निर्विकल्पकात्मकस्मृतेरेव गौरवमात्रं न च समानाविषय घटत्वविशिष्टानुभवपूर्व घटत्वविशिष्टस्मरणस्य तत्पूर्वं च घट
त्वनिर्विकल्पकस्मरणस्य कल्पनेन न दोष इति वाच्यं। तत्पूर्वं ज्ञानद्वयकल्पने गौरवात्। तदपेक्षया घटत्वनिर्विकल्पकानुभ

त.प्र. १८ वस्यैवस्वीकर्त्तुमुचितत्वादित्यत आह। स्मृत्युवेति। तथासति मयापि घटत्वविशिष्टानुभवपूर्वं घटत्वनिर्विकल्पकस्मर
णमेव कल्प्यत इति न ज्ञानद्वयकल्पने गौरवमिति भावः। न च निर्विकल्पकात्मकस्मृतिस्वीकारान्निर्विकल्पकात्म
कज्ञानं सिध्येदेवेति कथं विवादः इति वाच्यं। तथापि निर्विकल्पकानुभवस्यासिद्धत्वादिति। ननु निर्विकल्पकात्मकं स्मर
णमेवानुपपन्नं। तादृशोद्बोधकतत्प्रकारकस्मृतिं प्रति तादृशोद्बोधकतत्प्रकारकसंस्कारत्वेन हेतुत्वात् जायमानं सप्रकार
कमेव स्यात् न तु निष्प्रकारकमिति चेन्न। तादृशोद्बोधकस्मृतिं प्रति तादृशोद्बोधकसंस्कारत्वेनापि सामान्यकार्यकारणभावक
ल्पनात् तादृशोपेक्षाज्ञानं विना जायमाने ज्ञाने निर्विकल्पकत्वेव जायत इति दिक्। ननु सर्वत्र विशिष्टानुभवपूर्वं विशिष्टस्मरण
णान्निर्विकल्पकात्मकस्मरणस्य वा हेतुत्वकल्पने तत्स्मरणोऽनुभवकारणे तदनुभवे च स्मरणे तत्ताभिलापनवस्था। किंच पू
र्वानुभूतपदार्थस्याद्याद्यानुभवे स्मरणमेव कारणं वाच्यं। तच्च न संभवतीति। तज्जनककानुभवाभावात्। जन्मान्तरीयानुभ
वादेव तत्स्मरणोपगमे च जन्मान्तरानुभूतानां पदार्थानामपि स्मृतिप्रसंगादिति चेन्न आद्याद्यानुभवजनकस्मर
णस्य जन्मान्तरीयानुभवादेवोत्पादात् उद्बोधकसहकृतेनादृष्टवत्तेः। न च परादिस्मृतिप्रसंगः। तत्रफलोत राम १८

त्तौ अभिलाषादृष्टस्योद्बोधकत्वाकल्पनात् अन्यथा च्छायायाः आमामिकत्वेनादृष्टत्वादिति नाकिंचित्करत्वात्। न च संभवतीत्यस्मरणा
सम्भवतो न नु अदृष्टविशेषसहकृतोद्बोधकवशात् तज्जन्मान्तरानुभूतेषु चैव तत्तत्सामान्यस्मर्यताप्रतिपत्यत आह। नहीति। पूर्वेति
ति। जन्मान्तरीय इत्यर्थः। अननुभूतानामिति। चैत्रत्वादिजातेस्तच्छरीरावच्छिन्नत्वेनैव चैत्रशरीरस्य च जन्मान्तरीयत्वाभावेन तदुक्तिरिवैत्रत्वा
दर्थविषयकाभावादनुभवासंभवेन तत्स्मृतिसंभवः। तत्स्मरणस्य तदनुभवपूर्वकत्वनियमादिति भावः। ननु प्रयोजकोपंनि
यमो नोद्धरणं [illegible] इत्यत आह। न चेति। तस्य अननुभवस्य तत्त्वे तु त्वात् स्मरणहेतुत्वात्। तथा च स्मृतित्वावच्छिन्नं प्रत्यनु
भवस्य हेतुत्वे तानतादृशनियमस्याप्रयोजकत्वमिति भावः। न च ईदृशकार्यकारणभावे मानाभाव इति वाच्यं। तथा सति कदाचि
दननुभूतस्यानुभूतस्यान्तरेऽशे तु ये प्रात्मकज्ञानविषयस्य स्मरणापत्तेः। येषां प्रज्ञानत्वेन तद्धेतुतापादकावश्यकत्वात्। न च
संस्काराभावात्तत्र समापत्तिरिति वाच्यं। संस्कारस्य व्यापारद्वारा तस्यापि हेतुत्वात्। व्यापारेण च व्यापारिणो न व्याप्तिध्वभावे
न संस्कारेणानुभवान्यथासिद्धेः संभवात् उपजीव्यविरोधाच्चेत्याह। आशुविनाशिन इति। कालान्तरभाविफलं प्रतिका
रणत्वे व्यापारं विनानुपपन्नमिति तदनुपपत्तिसाधनात् चिर[illegible]ध्वस्तानुभवस्य कालान्तरीयस्मृतिहेतुत्वोपपत्त्यर्थं व्यापारकल्पना

न.प्र. येसंस्कारस्य व्यापारः कल्प्यतामिति। अनुभवस्य कारणत्वमुपजीव्यैव संस्कारसिद्धिरिति। ननु तर्हि ध्वंसत्वादनुभवध्वं- कृ
१९ सस्य व्यापारत्वमास्तां कृतमलं संस्कारकल्पनेनानवकाशाद्भूताभावप्रतियोगित्वस्यैव प्रतिबंधकत्वपदार्थत्वा-
त्स्मृतिकारणीभूतानुभवध्वंसप्रतियोगित्वस्यानुभवे सत्त्वात् प्रतिबंधकत्वापत्त्या न तस्य तत्त्वे तुल्यत्वमिति वाच्यं प्रति-
बंधकसंसर्गाभावत्वेनैव कार्यमात्रहेतुतया संसर्गाभावत्वावच्छिन्नकारणतायाश्च प्रतिबंधकत्वशरीरघटकत्वात् न
त्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावत्वावच्छिन्नकारणतानिरूपितायां तस्य अवच्छेदकैकदेशे अवच्छेदकताया
अनवच्छेदको यो धर्मः तद्वत्त्वस्यैव प्रतिबंधकत्वपदार्थत्वात् न तद्धर्मावच्छिन्नकार्यतानिरूपिताभावत्वावच्छि-
न्नकारणतानिरूपितत्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नावच्छेदकताकधर्मवत्त्वस्य तद्धर्मावच्छिन्न-
प्रतिबंधकत्वपदार्थत्वादिति निष्कर्षः तथा चानुभवध्वंसस्य ध्वंसत्वेनैव कारणतया भावत्वेनाकारणत्वान्न प्र-
तिबंधकत्वापत्तिरिति चेत्तर्हि सर्वांशोपेक्षात्मकज्ञानादपि स्मरणापत्तेः। अस्मन्मते चोपेक्षात्मकज्ञानत्वे- राम
न संस्कारहेतुतया तदभावाद्वास्मरणानापत्तेरस्मरणोपपत्तेर्वनेन रूपेणाहेतुत्वमस्तु कृतमंतर्गडुना संस्कारेणेति वा १९

यां उपेक्षात्वस्यैकस्याभावेन तत्तद्घटितत्वावच्छिन्नप्रतियोगिताकभेदकूटस्यैव निवेशनीयतया स्मृतिजनकतायां
सर्वांशोपेक्षाभेदसांशिकोपेक्षाभेदानामेकस्यानिवेशप्रसंगेन तेषां मिथो विशेषणविशेष्यभावे विनिगमनाविरहे-
ण कार्यकारणभावानंत्यप्रसंगात् तन्मते च संस्कारजनकतावच्छेदककोटौ सर्वांशोपेक्षाभेदानां सांशिकोपेक्षाभे-
दानां च स्मृतिजनकतावच्छेदककोटौ निवेशनप्रयोजनाभावात्तेषामनिवेशात् लाघवमस्तीत्युक्तमेवेति संस्कारसिद्धेरावश्य-
कत्वादिति कृतं प्रपंचितेन। ननु प्रमेयवानित्यनुभवे प्रमेयत्वेन चैत्रत्वविशिष्टस्यापि पूर्वमननुभूतत्वात् अयं इति
शेषस्य च प्रमेयघांशे उद्बोधकत्वाकल्पनेन केवलचैत्रत्वविशिष्टस्मरणोपपत्तेः। नन्वंशे सप्रकारकस्मृतिं प्रति
तदंशे सप्रकारकत्वेन तु नानुभवस्य हेतुत्वं स्मृतिमात्रं प्रत्यनुभवानां सघट इति स्मरणापत्तेः तत्वानित्यांशे उद्बोध-
कत्वात् प्रकल्पनेनैव वारणात् उद्बोधकत्वाभावत्वाद्भयोः फलोन्नेयत्वादिति। अत एव चादृष्टाद्युद्बोधकाद्यादि
मनः पराहितशक्तिरयं हेतोरस्मिन्नस्याह किंचेति। तस्मृत्वाप्रतिनिरुद्बोधकविरहादिति शेषः। विशिष्टत्वानेसामग्र्यभावा-
त्। घटत्वेनानुपस्थितघटत्वप्रकारकज्ञानसामग्र्यभावान्न स्यात्स्मरणसामग्रीतः। वस्तुसंयोगवस्तुसंयुक्तसमवाय

त.प्र.
२०

रूपं वा स्मृत्युपनीतस्य सामग्र्या तत्साक्षात्कारो यतो वा स्मृत्युपनीतस्योपनीतौ । न त्वेतावता साक्षात्कारोऽस्ति तावता निर्विक-
ल्पकसिद्धिरित्यत आह । न हि एवं वेति । घटत्वज्ञानस्य प्रथमकाले ज्ञायमानं प्रत्यक्षमेवेत्यर्थः । सुगन्धि कं नैयायिकानां
निर्विकल्पकासिद्धिः ~~कज्ञानमितिमात्रोऽननुमेये~~ इति । तथा च घटत्वज्ञानाभावाज्ज्ञायमानं घटज्ञानं निष्प्रका-
रकमेव भविष्यतीति सिद्धं निर्विकल्पकात्मकं ज्ञानमिति भावः । ननु रक्तो दण्ड इत्येतत्संशयोत्तरकल्पविशिष्टं दण्डवैशि-
ष्ट्यावगाहिज्ञानानुदयाद्विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतायाः
आवश्यकत्वात्तत्र दण्डज्ञानस्य प्रथमकाले दण्डविशिष्टपुरुषज्ञानानुत्पत्तिनिर्वाहे स्वले विशिष्टबुद्धिं प्रति विशेषणा-
ज्ञानस्य हेतुतया न तु विशिष्टवैशिष्ट्यमिति न्यायेन विषयताशालिबुद्धिं प्रत्येव विशेषणतावच्छेदकप्रकारकनि-
र्णयस्य हेतुत्वेन दण्डज्ञानस्य प्रथमकाले विशेष्ये विशेषणं तत्रापि विशेषणान्तरमिति न्यायेन दण्डविशिष्टज्ञानापत्तिवारणा-
य न तस्य हेतुत्वमावश्यकमिति चेत् । न तथापि यापि न तत्वेनोरेवेति न्यायेन विशेषणविशेष्यसंनिकर्षादेव विशिष्ट- राम २०
प्रत्यक्षोत्पत्तेः । अनुमित्यादौ तु परामर्शादिरेव नियामक इत्याशयेनाभ्यां तस्य कुत्राशंकते । नन्विति । हेतुतासिद्धो वि-

शिष्टज्ञानं प्रति हेतुतासिद्धौ । सर्वमिदं तन्निर्विकल्पादिसाधनं । एवं सत्यां । पूर्वोक्तन्यायेन सद्युक्तिकं स्यात् । नैवं वेति । विशेषणा-
ज्ञानस्य विशिष्टज्ञानं प्रति हेतुत्वमेवेत्यर्थः । मानाभावादिति । विशेषणविशेष्यसन्निकर्षादेव तदुपपत्तेस्तत्र प्रमाणाभाव इत्यर्थः ।
प्रमाणाभावस्य च प्रमेयाभावव्याप्यत्वादिति भावः । अन्वयव्यतिरेकाभ्यामिति । विशेषणज्ञानसत्त्वे विशिष्टज्ञानसत्त्वं विशेष-
णज्ञानाभावे विशिष्टज्ञानाभाव इत्येवंरूपान्वयव्यतिरेकाभ्यामित्यर्थः । तदवधारणात् । विशेषणज्ञानस्य विशिष्टबुद्धिहे-
तुत्वावधारणात् । यथान्वयव्यतिरेकाभ्यां दण्डघटकारणत्वग्रहस्तथा प्रकृतेऽपीति भावः । ननु न केवलमन्वयव्यतिरेकाव-
धारणात्तथा हेतोः प्रतिप्रसंगात् । अविलम्बमयथासिद्धान्वयव्यतिरेकाभ्यां प्रकृते च विशेषणविशेष्यसन्निकर्षेणापि वि-
शेषणज्ञानस्यान्यथासिद्धत्वात् तथाविधयोस्तयोः संभवादित्यत आह विलम्बादिति । अनुसंधेय इति । कदाचित् घट इति त्वरूप-
तो घटत्वप्रकारकज्ञानस्य कदाचित्त्वजातिमानिति जातित्वरूपेण घटत्वप्रकारकज्ञानस्योत्पत्तिरिति नियमानिर्वाहाय त्वरू-
पतो घटत्वविशिष्टबुद्धिं प्रति त्वरूपतो घटत्वज्ञानत्वेन जातिमत्त्वेन घटत्वविशिष्टबुद्धिं प्रति च जातित्वेन घटत्वज्ञानस्य हे-
तुतायाः आवश्यकतया विशेषणज्ञानस्य हेतुतासिद्धिः । अथ घटत्वज्ञानसत्त्वे विकल्प्य कदाचिदयं घट इत्याकारकघटत्वप्रका-

न.प्र.
२२

रकज्ञानस्य कथंचित्सात्र घटत्वमित्याकारकघटत्वविशेष्यकज्ञानस्यैतत्प्रामाण्यतन्निरीहावानायत्वात् तत्र ज्ञाने घटहष्टविशे
षस्यैव नियामकत्वमावश्यकं तथा च प्रकृतेपि घटहष्टविशेषविशेषेण तथाविधकारणविकल्पज्ञानद्वयोपपत्तेरलं विशेषणा
ज्ञानहेतुत्वेनेति चेन्मैवं तत्रानपेक्षणाभावेनादृष्टस्य नियामकत्वकल्पनेपि प्रकृते दर्शितरीत्या गतिसंभवेऽदृष्टविशेष
स्य नियामकत्वाकल्पनात् अनुमायत्वतात्प्रकृत्वादृष्टस्य नियामकत्वकल्पनादृष्टस्यापि तस्यैव नियामकत्वकल्पने कार्यका
रणभावमात्रोच्छेदापत्तेरिति ननु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वेनाम घटत्वांशेऽप्रकारकघटत्वप्रकारकबुद्धि
त्वमत्र च जातित्वादिभासकसामग्रीसत्त्वे जायमानं ज्ञानं घटत्वांशेऽप्रकारकमेव तथा तेन तदंशे जातित्वादिभासकसामग्र
सत्त्वे च घटत्वांशेऽप्रकारकमेव जायत इति ताद्दशधर्मस्य नीलत्वे तु घटत्वादिवदर्थसमाजग्रस्तत्वेन तत्समतानवच्छेद
कत्वात्कथं ताद्दशज्ञाने प्रतिस्वरूपतो घटत्वज्ञानस्य हेतुत्वं कल्प्यं विशेष्यविशेषणज्ञानहेतुत्वसिद्धिरिति चेन्न जातित्वभा
सकसामग्रीसत्त्वेपि जातिमान् घट इति स्वरूपतो घटत्वविशिष्टबुद्ध्युदयात् घटत्वांशे निरवच्छिन्नप्रकारताशालिज्ञाने राम
त्वमेव स्वरूपतो घटत्वविशिष्टबुद्धित्वं तदवच्छिन्नं प्रति च स्वरूपतो घटत्वज्ञानस्य हेतुत्वं कल्पनां विनानुपपत्तिवासमा २२

संभवादिति ननु नित्यव्यावर्त्तनापत्त्या विशिष्टज्ञानत्वमेव विशेषणज्ञानकार्यतावच्छेदकं वाच्यं तत्र च जन्यत्वं ध्वंसप्रति
योगित्वं वा प्रागभावप्रतियोगित्वं वा कालिकसंबंधेन घटादिमत्त्वं वेत्यत्र विनिगमनाविरह इति चेन्न अनित्यवृत्तिधर्मस्य
पि कार्यतावच्छेदकत्वे क्षतिविरहात् स्वघटकारणत्वानुपपत्तिः कारणत्वं हि कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्या
धिकरणे देशनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं। तद्घटाधिकरणकपाले यत्किंचिद्घटाव्यवहितपूर्वक्ष
णावच्छेदेन तद्घटाभावसत्त्वात्कारणत्वानुपपत्तिरिति तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणे तदभावप्र
तियोगितानवच्छेदकधर्मवत्त्वं वाच्यं। तथा सति घटत्वावच्छिन्नं प्रति तादात्म्येनापि कारणत्वप्रसंगात् यत्किंचिद्घटाव्यवहि
तपूर्वक्षणावच्छेदेन कपाले तदभावसत्त्वात् तथा च कार्यतावच्छेदकावच्छिन्नयावद्घटव्यक्तीनां तत्तद्घटव्यक्तित्वेन घटत्वेन तत्तत्का
र्याव्यवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणे तदभावेऽस्त्वेव वाच्यं। एवं चानित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे कार्य
तावच्छेदकावच्छिन्नयावदन्तर्भूतो नित्यव्यक्तेरपि प्रविष्टतया तदव्यवहितपूर्वक्षणाप्रसिद्धिरिति चेन्न कार्यकारणभेदे
न कारणतायाभिन्नतया प्रकृते नित्यव्यक्त्यप्रतीतिः कथंचित्तानामेव तत्तद्घटव्यक्तित्वेनोपादानात् तत्साधारणरूपेण कार्यत्वेऽपि

रकज्ञानस्य करणविधया तत्र घटत्वमित्याकारकघटत्वविशेष्यकज्ञानस्योत्पत्त्या तन्निर्वाहात् यानापत्त्या तत्तज्ज्ञानेच्छेदकविशे
षस्यैव नियामकत्वमावश्यकं तथा च प्रकृतेपि च्छेदकस्य विशेषणीभवनयाविधकारणविकज्ञानद्वयोपपत्तेरलं विशेषण
ज्ञानहेतुतयेति चेत् मैवं तत्र ज्ञानान्तराभावेनादृष्टस्य नियामकत्वकल्पनेपि प्रकृते दर्शितरीत्या तत्संभवेऽदृष्टविशेष
स्य नियामकत्वाकल्पनाया अन्याय्यत्वात् । एकत्राप्यदृष्टस्य नियामकत्वकल्पनादन्यत्रापि तस्यैव नियामकत्वकल्पने कार्यका
रणभावमात्रोच्छेदापत्तेरिति ननु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वेनाभावघटत्वांशेऽन्यप्रकारकघटत्वप्रकारकबुद्धि
त्वमत्र चेज्जातित्वादिभासकसामग्रीसत्त्वे जायमाने ज्ञाने घटत्वांशेऽन्यप्रकारकमेवोत्पद्येत तदंशे जातित्वादिभासकसामग्री
सत्त्वे च घटत्वांशेऽन्यप्रकारकमेव जायत इति नाद्यः घटत्वधर्मस्य नीलत्वेनाघटत्वादिवदार्थसमाजग्रस्तत्वेन तन्मात्रानवच्छेद
कत्वात्कथं नाद्यः शङ्का नं प्रति स्वरूपतो घटत्वज्ञानस्य हेतुत्वं कल्प्यमित्यविशेषणज्ञानहेतुत्वसिद्धिरिति चेन्न जातित्वभा
सकसामग्रीसत्त्वे विजातिमान् घट इति स्वरूपतो घटत्वविशिष्टबुद्ध्युदयात् घटत्वांशे निरवच्छिन्नप्रकारताशालिज्ञान
त्वमेव स्वरूपतो घटत्वविशिष्टबुद्धित्वं तदवच्छिन्नं प्रति च स्वरूपतो घटत्वज्ञानस्य हेतुत्वकल्पनां विना उक्तापत्तिवारणा

संभवादिति । ननु निरुक्ताव्यावर्त्तनाय जन्यविशिष्टज्ञानत्वमेव विशेषणज्ञानकार्यतावच्छेदकं वाच्यं तत्र च जन्यत्वं ध्वंसप्रति
योगित्वं वा प्रागभावप्रतियोगित्वं वा कालिकसंबन्धेन घटादिमत्त्वं वा सर्वविनाशमनादिरिति चेन्नानित्यवृत्तिधर्मस्या
पि कार्यतावच्छेदकत्वे क्षतिविरहात् । अन्यथैवं कारणत्वानुपपत्तेः । कारणत्वं हि कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्या
धिकरणदेशनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं । तच्च घटाधिकरणकपाले यत्किंचिद्दण्डाव्यवहितपूर्वक्ष
णावच्छेदेन दण्डाभावसत्त्वात् कारणत्वानुपपत्तिरिति तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणे तदभावप्र
तियोगितानवच्छेदकधर्मवत्त्वं वाच्यं । तथा सति घटत्वावच्छिन्नं प्रति दण्डत्वेनापि कारणत्वप्रसंगः यत्किंचिद्दण्डाव्यवहि
तपूर्वक्षणावच्छेदेन कपाले तस्य सत्त्वात् तथा च कार्यतावच्छेदकावच्छिन्नयावद्घटनिष्ठत्वं तत्तद्घटव्यक्तित्वेन घटत्वेन तत्का
र्याव्यवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणे तदभाववत्त्वं वाच्यं । एवं च नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे कार्य
तावच्छेदकावच्छिन्नयावदन्यतमत्वेन नित्यव्यक्तेरपि प्रविष्टत्वात् तदव्यवहितपूर्वक्षणाप्रसिद्धिरिति चेन्न कार्यकारणभाव
न कारणतायामित्यत्र प्रकृते नित्यव्यक्त्यतिरिक्तव्यक्तीनामेव तत्तद्व्यक्तित्वेनोपादानात् तत्साधारणरूपेण कार्यत्वेपि

त.प्र.
२२

कारणत्वेबाधकाभावात्। एवं समवायकालिकविशेषणतोभयसंबंधेन विशिष्टज्ञानत्ववत्त्वस्य कार्यतावच्छेदकत्वे
ननित्यसाधारण्याभावाच्च। वस्तुतस्तु जन्यप्रत्यक्षमात्रवृत्तिवैजात्यस्वीकारे विशेषणज्ञानीयविशिष्टज्ञानत्वस्यैव नकार्यतावच्छे
दकत्वात्। चाक्षुषत्वादिना संकोचे यावद्विनिर्विकल्पके पितद्वैजात्यस्वीकारः। अतएव जन्यधीजन्यमात्रवृत्तित्वाद्विशे
षवैजात्याभावाज्जन्यसाक्षात्कारोऽप्यनुव्यवसायसाक्षात्कारत्वस्य व्याप्यवृत्तिपरात्वात्तस्य निर्विकल्पकसाधारण्येन ज
न्यधीजन्यमात्रवृत्तित्वाभावात्। मानसामानसवृत्तित्वाभावाच्च न तत्त्वं साक्षात्त्वं तु मानसावृत्तित्वेन जन्यनैर्विशेषणीयत्वादि
त्युक्तत्वादिति दिक्॥ निर्विकल्पकं निरूपयत्वसङ्गात् सविकल्पकं निरूपयति वैशिष्ट्यावगाहीति। संबंधविषयकमि
त्यर्थः। ननु इन्द्रियसंबद्धविशेषणतानुपपत्तिकत्वान्निर्विकल्पके विशेष्यभाने बाधकाभावात्तस्यापि वैशिष्ट्यावगा
हित्वमतोऽतिव्याप्तिरित्यत आह सप्रकारकमिति। किंचिन्निष्ठप्रकारताशालीत्यर्थः। निर्विकल्पके च प्रकारतया राम
घटत्वादेरभानान्नातिव्याप्तिरिति भावः। वस्तुतस्तु वैशिष्ट्यावगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्यावगाहीत्यर्थः। किंचि २२
न्निष्ठसांसर्गिकविषयताशालित्वमिति निष्कर्षः फलितोऽर्थः। ननु किंचिन्निष्ठप्रकारताशालित्वमित्यपि वक्तुं शक्यत एवेति

नकुतोनोक्तमितिचेत्तदुक्तप्रायत्वात्तथैवाह। सप्रकारकमिति। इदमुपलक्षणं। किंचिन्निष्ठविशेष्यताशालित्वमपि बोध्यं।
ननु सप्रकारकमित्यत्र प्रकारत्वं निर्विशेषं किं न सप्रकारत्वमित्यत आह तन्निरूपयति। प्रकारता चेति॥ ज्ञाने इति। निरूपितत्वं
सप्तम्यर्थः। घटत्वादेरिति। निष्ठत्वं षष्ठ्यर्थः। ज्ञाननिरूपितो घटत्वनिष्ठो विषयताविशेष इत्यर्थः। विषयताविशेष इति। वि
शेष्यताख्यविषयताप्रकारताख्यविषयतासांसर्गिकविषयतारूपत्रिविधविषयताभेद इत्यर्थः। ननु किं तद्विषयत्वम
त आह। विषयता चेति विषयेति। घटो ज्ञानविषयः पटो ज्ञानविषय इत्यनुगतप्रतीतिसाक्षिक इत्यर्थः। स्वरूपसंबंध
विशेष इति। ज्ञानविषययोः स्वरूपसंबंध इत्यर्थः। ननु विषयतायाः स्वरूपसंबंधत्वांगीकारे प्राचीनमते तस्याः ज्ञानस्वरू
पत्वं विषयस्वरूपत्वं वा न तावदाद्यः ज्ञानस्वरूपत्वे घटवद्भूतले घटज्ञानविषयतयोरभेदेन घटवद्भूतलमिति ज्ञानोत्तरं घटनि
ष्ठप्रकारतानिरूपितभूतलत्वनिष्ठविशेष्यताशालिज्ञानकालेऽपि तु व्यवसायवद्भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठवि
शेष्यताशालिज्ञानकालेऽपि तदनुव्यवसायापत्तेः। द्वितीयेऽपि तत्समूहालंबनज्ञानस्यानुव्यवसायापत्तेश्च। तत्ज्ञानस्यैक्येन त
त्स्वरूपघटपदादिविषयताकाद्युपभेदेन घटत्वाभाववन्निष्ठविशेष्यतानिरूपितघटत्वनिष्ठप्रकारताशालिज्ञानत्वरूप

त.प्र.
२३

श्यामत्वस्य तत्र सत्त्वात्। न द्वितीयः। घटभूतलसंयोगाः घटवद्भूतलमिति निसमूहालंबनविशिष्टबुद्ध्योर्विषयतायामेकस्य न
विषयकत्वेन वैलक्षण्याभावात् द्विषयताकत्वप्रयुक्तवैलक्षण्यं वाच्यं। तत्र च विषयतो यादि विषयस्वरूपत्वे विषयस्वरूपाणां तासा
मपि वैलक्षण्याभावात् समूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिः। किं च जीगाहुकेण न च समूहालंबनाविषयस्य घटप्र
तियोगिकत्वभूतलानुयोगिकत्वरूपसंबंधस्य संबंधस्यापि विशिष्टबुद्धिविषयत्वान्न वैलक्षण्यानुपपत्तिरिति वाच्यं।
घटभूतलसंयोगप्रतियोगित्वानुयोगित्वातिरिक्तसंबंधसंबंधविषयकस्यापि समूहालंबनस्य संभवात्। न च समूहालं
बने संयोगत्वेन संयोगभानाभावान्नानुपपत्तिरिति वाच्यं। घटवद्भूतलं संयोगश्चेति विशिष्टज्ञानस्य तादृशसमूहालंबना
द्वैलक्षण्यानुपपत्तेरिति न स्यात्। स्वरूपसंबंधरूपत्वे दुर्वचमिति तत्र आह। पदार्थान्तरमिति। तथा चातिरिक्ताया विषयताया
विषयभेदेनाभिन्नतया नेपूर्वोक्तानुपपत्तिरिति भावः। केचित्तु स्वरूपसंबंधरूपाया विषयताया अननुगमेनानुगतप्रत्य
यानुपपत्तिरित्यत आह। पदार्थान्तरमिति नाहुः। तदसत्। तस्या अतिरिक्तत्वेपि तत्तद्विषयभेदेन भिन्नतया अनुगतप्रत्य राम
यानुपपत्तितादवस्थ्यात्। नचानुगतप्रत्ययानुपपत्तिः कथं कारणतायेति वाच्यं। विषयतात्वेनैकसंगीकृतत्वेनैवेह अ २३

तएव घटत्वादिविशिष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन हेतुतायां विषयतायाः प्रकारतादिविशेष्यत्वादिभेदेनाभिन्नतया
एकस्याः निवेशः स्वविधेयविषयताशालिज्ञानात् न विशिष्टबुद्ध्यनुत्पत्त्यापत्तिरपि निरस्ता। तत्र विषयतात्वेन प्रकारतादि
शेष्यतयोरनुगमेनानुपपत्त्यभावादिति ध्यात्वा विशेष्याः। घटं जानामीत्यादौ ज्ञानजन्यघटादिनिष्ठज्ञाततारूपपदार्थान्तरमंगीका
र्यमन्यथा घटस्य कर्मत्वानुपपत्तेः। क्रियाजन्यफलशालित्वस्य कर्मत्वरूपत्वात्तत्रैव ज्ञानं निमित्तकारणं समवायिका
रणं च घटस्तद्देव विषयत्वमिति निष्कृष्टमूलमतमाह। पदार्थान्तरमिति। ज्ञानजन्यः निमित्तकारणविधया ज्ञानजन्यः
विषयनिष्ठ इति समवायसंबंधेन विषयहत्तिरित्यर्थः। सैव हि ज्ञातेनैव संबंधस्वरूपेति। अतिरिक्तसंबंधस्वरूपेत्यर्थः
पुरुषो मम दुःखं कं। एतत्तज्ज्ञानजन्याविषयनिष्ठज्ञाततारूपपदार्थान्तरांगीकारे। अन्यथेति। ज्ञानजन्याविषयनिष्ठज्ञा
तरूपपदार्थानंगीकारे इत्यर्थः। ज्ञानकर्मत्वमिति। घटं जानामीत्यादौ घटादेः। क्रियाजन्यफलशालित्वरूपंक
र्मत्वमित्यर्थः। क्रियेति। ज्ञानरूपधात्वर्थजन्यफलवत्त्वाभावादित्यर्थः। विनष्ट इति। घटस्य नष्टत्वेन तत्र ज्ञानजन्यज्ञानता
या असंभवादिति भावः। तद्देशोपपादयति। नष्टेति। तत्र विनष्टे घटे। तस्यैव घटस्यैव। असत्त्वात्तत्र एतत्तापत्त्यासमसान

त.प्र.
२४

ष्टे घटेऽपि विषयतासंबंधेन ज्ञानमुत्पद्यते तथा ज्ञाने नापि तत्र तदुत्पादने शङ्काभावादित्यत आह नवेति। समवायिकारणस्य
कार्यसहभावेन हेतुत्वात् घटस्य नाशे न तदुत्पत्तिसंभवः समवायासमवायिकारणनाशस्य समवेतनाशे हेतुत्वात् ज्ञानतो न
त्विति। ज्ञाने वक्ष्यमाणवत्तस्या नाशाद्व्यभिचारित्वप्रसंगादिति भावः। ननु तत्र विषयतया ज्ञानत्वावच्छिन्नस्य भावेऽपि स्वनिरूपसंबंध
रूपत्वमेवास्तां विनाशोऽकृतेनात्रेत्यादि। नन्वत्र नष्टघटस्थले प्रतीतेः। ज्ञानतो घट इति प्रतीतेः। अन्यथेति। विद्यमानघ
टस्थले पार्थः। प्रमाणाभावादिति। स्वनिरूपसंबंधेन विषयोऽस्तीत्यर्थः। आधिक्येनेति। स्वनिरूपसंबंधेनेति। ज्ञानतान्निरूपवि
षयत्वस्याकारणत्वार्थः। ननु सर्वत्र स्वनिरूपसंबंधस्य विषयत्वनिरूपत्वे तस्य ज्ञानजन्यत्वाभावात् घटस्य क्रियाजन्यफलशा
लित्वरूपे मुख्यकर्मत्वाभावेन कर्मणि द्वितीयेति सूत्रेण घटं जानातीत्यादौ घटपदोत्तरं द्वितीयाविभक्त्यनुपपत्तिरित्य
त आह कर्मविभक्तेरित्यादि। द्वितीयाविभक्तेरित्यर्थः। नष्टे वानष्टघटस्थले वेति। अतीतवर्तमानघटस्थले घटप
दोत्तरं द्वितीयोपपत्त्यर्थं गौणमुख्यसाधारणकर्मत्वविशिष्टं पदं कर्मणि द्वितीयेति सूत्रस्थकर्मपदस्य शक्यं स्वीका
र्यं समवायिवृत्तेनैव विद्यमानघटस्थले घटपदोत्तरं द्वितीयोपपत्तिरित्यर्थः। एवं च क्रियाजन्यफलशालित्वरूपमुख्यक

राम
२४

र्मत्वाभावेऽपि सविषयकत्वव्यवच्छेदकत्वानुमतमिथ्यानष्टस्थले विषयत्वरूपं गौणमेव कर्मत्वमिति नानुपपत्तिरिति हृदयं।
ननु तन्नाशेऽप्यभावो ज्ञानं इति प्रतीत्या भावेऽपि ज्ञानतायाः स्ववृत्त्यङ्गीकारात् समवायिकारणं विना भावकार्यो
त्पत्तेसंभव इति नियमभंगः। तथा च नष्टघटस्थले विनानुपपत्तिरित्यत आह संसर्गेति। समवायस्यापीति प्रकृ
त्वेनेत्यंगीकारादित्यलक्षणत्वनिरूपसंबंधेन तस्याश्रयत्वमेव समवायिकारणत्वं एवं चाविलक्षणसंबंधेन तस्याश्रयं विना
तस्यानुत्पत्तिरित्येव नियमः। अभावस्थले चाविलक्षणसंबंधेन तस्याश्रयत्वमभावस्याङ्गीक्रियते विलक्षणसंबंधेन
त्वाश्रयघटस्य सत्वाच्च नष्टघटस्थलेऽप्यनुपपत्तिर्नाग्रहकेचेति भावः। स्वमतानवष्टम्भेनेदं दूषणमिति सूचितं केचिदिति। वस्तु
तस्तु गौणकर्मत्वेनाप्युपपन्नेरिति। ज्ञानतायाः प्रमाणाभावान्न तद्रूपत्वे विषयताया इत्येव दूषणांशाणां प्रकारता
न विषयताविशेषः। किं तु प्रतियोगित्वमेवेत्यगौणकर्तृकाणां केषाञ्चिन्मतमाह। अन्योन्येत्यादिना। भासमाने पदे हि शसं
संबंधस्यानि प्रतियोगित्वमित्यर्थः। गुरुत्वे दंड इति ज्ञानेऽपि दंडस्य प्रकारत्वापत्तिः संयोगप्रतियोगित्वस्य दंडे सत्वात् अ
तो भासमानेति। तत्र ज्ञाने च दंडप्रतियोगिकसंयोगस्याभानान्नातिव्याप्तिः। प्रतियोगित्वं च स्वनिरूपसंबंधविशेषः

न.प्र. २५ वा इदमेव संगमयति स्वरूपमिति। घटत्वस्य वैशिष्ट्यं घटत्वनिरूपितः समवायः। संयोगो हीति। वस्तुगत्याभावसमानो यः सं
योगस्तत्र सांयोगित्वस्य हेतुसत्त्वात्तत्प्रकारकत्वापत्तिरित्यर्थः॥ न तु तत्प्रतियोगिकत्वेन भासमाने यद्देशे ऽत्रसंतत्प्रतियो
गित्वमर्थः। समूहालंबने विशिष्टबुद्धौ भेदानुपपत्त्या विशिष्टज्ञाने प्रतियोगित्वानुयोगित्वरूपसंबंधसंबंधोऽपि भासत
इत्युपेयते समूहालंबने च हेतुप्रतियोगिकत्वेन संयोगस्याभानात्तत्रातिव्याप्तिरित्यत आह। हेत्विति। तथा च हेतुरूपव
हेतुप्रतियोगिकसंयोगादिसंमूहालंबनेऽतिव्याप्तिः न चात्र हेतुप्रतियोगिकत्वस्य संबंधसंबंधविधया न भानमिति
वाच्यं॥ तथा सति सांसर्गिकविषयताया अतिरिक्तत्वाभ्युपगमे किमपराद्धं प्रकारतया संबंधसंबंधस्य विशिष्टज्ञान
विषयत्वेनोक्तं च। विषयपदं तद्वैलक्षण्याभावेऽपि विषयताकृतवैलक्षण्येन ज्ञानानां वैलक्षण्योपपत्तेरित्याशयः। घटत्वं नवेति
। साक्षात्कारात्मकप्रमाकारणं चेत्यर्थः। तृतीयानुव्यवसायात्मकप्रमाकारणत्वस्य प्रथमानुव्यवसायेऽसत्त्वान्न हानोपादानो
पेक्षाद्यप्रमाकारणत्वस्य निर्विकल्पकेऽसत्त्वान्न सविकल्पकादिप्रमाकारणत्वस्य वस्तुगत्या संयोगेऽसत्त्वान्नस्य बहुविधत्वमि
तिमतनिराकरणायाह इंद्रियात्मकमिति। वस्तुगत्यादिकमेव प्रत्यक्षप्रमाकरणमनेनोक्तं तु व्यापारत्वमिति भावः। वस्तुतस्तु राम २५

प्रत्यक्षप्रमाप्यसमिति। करणायेंद्रियेति द्रव्यग्राहकत्वं द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मवत्त्वं तेनेनोपनी
तभाने मानसप्रत्यक्षेऽपि इंद्रियाद्यावर्तितप्रसंगः। अनुपधायकत्वं तु वस्तुतः संयुक्तसमवायजनकतावच्छेदकधर्मवत्त्वमिति विशेषः। तद्ग्राहकं च
द्रव्याग्राहकं चेत्यर्थः। द्रव्याग्राहकत्वं च द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मशून्यत्वं तेन चानुपधायकत्वे
ऽपि वस्तुविनाशितप्रसंगः। नन्वापि वस्तुगत्यास्य समवायादेरिति। अस्मद्द्रव्याग्राहकेतात। तन्निति॥ अं संबंधस्य घटसन्निकर्षस्याशीतेऽज्ञा प
तत्त्वेऽप्यतो विप्रकृष्टेति। हानोपादानेत्यर्थः। तत्॥ मनः स्वान्यमात्रे ग्राहकमिति। तथा च मनसः स्वान्यग्राहकत्वेन घट
इत्यत्रापत्तिरिति भावः। सर्वेति। मनः सर्वविषयकज्ञानजनकमिति। साधोनिभ्यंतरप्रसंगादित्यर्थः। सर्वविषयकमपि त
द्विषयकज्ञानजनकमपि तथा वक्तना इत्यादि सोऽन्तरभंगादिति भावः। पातंत्रमिति। स्वेतरबाह्यविषयकज्ञानजनकत्वाम
ग्राहाविष्टमित्यर्थः। तथा बोधस्य विप्रकृष्टघटादीनां मनसा न ग्रहणापत्तिरित्यस्य क्वचित् वस्तुगत्या भावादेरिति भावः। किं त
तामनसो ग्राहकमिति। मीमांसकैस्तन्न लक्षणाविशेषात् लक्षणायोगजधर्माद्यसत्त्वेऽपि मनसः स्वद्रव्यगत्या इंद्रियमात्रे
ग्राहकत्वमेवोच्यते अतएव मनसा संयुक्तेन इंद्रियेणेंद्रियमर्थेनेंद्रियाणां वस्तुगत्याप्रकाशकत्वं

नियमादिति संगच्छता इति तन्मतं निराकर्तुमाह ज्ञानेत्युनीति। चक्षुरादिसमवधानमिति। चक्षुरादिकमेव यत्र मिलितं न युक्तं च यं। ना
च पदेन ज्ञानलक्षणादिरवच्छेद्यः। तथा च चक्षुरादिव्यापारं विनापि ज्ञानलक्षणासहकारेण कदाचिन्मनसा ज्ञानजननान्ने
न्द्रियसहकारित्वमावश्यकं तु पूर्वोक्तनियमस्तु लौकिकप्रत्यक्षस्थल एवेति भावः। ननु ज्ञानलक्षणासहकारेण मनसा
ज्ञानजनने नेमान्याभावरूपत्वमाह अस्मन्नेति। संसर्गेति। यत्र संसर्गाग्रहेऽसमर्थः। ननु यत्र संसर्गाग्रहे कात्यक्षतिरत आह कथ
मस्येति। अन्यथा ज्ञानलक्षणासहकारेण मनसास्य तत्पदार्थानां यत्र संसर्गाग्रहेऽसमर्थः। कविकाव्यादीति। कविना स्व
निविषयीभूतपदार्थानां यत्र संसर्गाग्रहे काव्यं विरचितेनाम यथा वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात्॥ तथा च तत्स्वीका
रे संसर्गाग्रहाभावेन काव्यरचनोच्छेदप्रसंग इति तत्स्वीकार आवश्यक इति भावः। इदमुपलक्षणं। लौकिकसन्निकर्षं विनापि
घटो नास्तीत्याद्यभावांशे घटस्य भानात् एवं सौरभे लौकिकसन्निकर्षं विनापि सुरभिचन्दनमिति चाक्षुषोदयाच्च तत्स्वीकार
स्यावश्यकत्वमिति ध्येयं। लौकिकासत्तद्विषयताशालिप्रत्यक्षत्वावच्छिन्नं प्रति किंचिद्विषयतावच्छिन्नसन्निकर्षविषयताशा राम
लिज्ञानत्वेन हेतुत्वेति कार्यकारणभावो बोध्यः। कार्यतावच्छेदके लौकिकासत्त्वनिवेशात् सायानिकविशिष्टबुद्धौ लौकि २६

कसन्निकर्षजन्यनिर्विकल्पके च व्यभिचारः। कारणतावच्छेदके किंचिद्विषयतावच्छिन्नत्वनिवेशान्निर्विकल्पकोत्तरमु
पनीतभानापत्तिः। निर्विकल्पकस्याप्युपनायकत्वोपगमे तु तद्विषयताशालिज्ञानत्वेनैव हेतुत्वेति बोध्यं। सामान्यलक्षणा
जन्यज्ञाने व्यभिचारवारणाय लौकिकत्वं कहितो त्वात्वसंबंधेन कारणविशिष्टं निवेश्यं। तद्धर्मिकप्रकारकज्ञानजन्यत्वनिवेशे तद्
ज्ञे घटत्वद्रव्यत्वादिरूपनानाधर्मप्रकारकतास्त्वनिरूपितजन्यतान्यमनुगमकरूपाभावादिति। इत्थं च कार्यतावच्छेदके लौ
किकासत्त्वानिवेशेऽपि न क्षतिरिति ध्येयं। योगजधर्मेति। सामान्यलक्षणाप्रत्यासत्तिस्वीकारेऽनुभवमेव प्रमाणयति। योगिना
मित्यादिना। योगिनां योगजधर्मसहकारेण मनसा चक्षुरादिव्यापारं विनापि सर्वविषयकं लौकिकसाक्षात्कारोदयात्तत्स
हकारित्वमावश्यकमिति भावः॥ प्रत्यक्षादिति। सर्वत्र प्रत्येयचक्षुरादिव्यापारं विनापि प्रत्येयत्वेन प्रमेयमात्रविषय
कालौकिकसाक्षात्कारोदयात्तस्यापि सहकारित्वमावश्यकमिति भावः। सर्वत्रेति। बहिर्विषयकज्ञानजनने क
सामग्र्यनपेक्षितमित्यर्थः। अव्याप्येति। अव्याप्यविषयकज्ञानजननेऽसमर्थः। अव्याप्यानीति। योग्यानीति शेषः।
नयोग्येति आत्मयोग्यगुणा इत्यर्थः॥ तद्भावः योग्यगुणाभावः। तेऽद्वतीति। आत्मवृत्तिसमवेतयोग्यगुणाद्भिन्नि

त.प्र. २७

जातित्वेत्यर्थः। सा चात्मत्वज्ञानत्वादिः। न त्वेकत्वेति। आत्मैकत्वपरममहत्त्वमात्रगोचरेत्यर्थः। द्रव्यसाक्षात्कारसामग्रीस-
त्त्वेन द्रव्यसंख्यापरिमाणादिग्राहकसामग्र्या अपि सत्त्वात् द्रव्यसाक्षात्कारस्य संख्यापरिमाणविषयकत्वनियमेनात्म-
मानसे तयोरपि भानसंभवादिति भावः। न योग्येन लौकिकमानससाक्षात्कारविषयाभूते इत्यर्थः। आत्मत्वं च मनःसंयुक्तस-
मवायरूपकारणबलात् ज्ञानादीनामिव तयोरपि मानसे बाधकाभावः। न च तथा सति संस्कारादीनामपि मानसत्वाप-
त्तिः सामग्र्याः सत्त्वादिति वाच्यं। तत्र तज्जातीयसंस्कारस्य प्रातिस्विकरूपेण विजातीयगुणत्वेन वा प्रतिबंधकत्वकल्पनात्त-
द्रूपसंख्यापरिमाणयोरपि प्रातिस्विकरूपेण प्रतिबंधकत्वे प्रतिबंधकतावच्छेदकवैजात्यस्यैकाकारे गौरवात्तत्परिहारेण
किंचिद्बाधकं। न च ज्ञानादियोग्यगुणोच्छेदसंस्कारव्यावृत्तं वैजात्यं स्वीकृत्य विजातीयगुणविषयकमानसं प्रति विजाती-
यगुणत्वेन हेतुत्वात् तादृशवैजात्यस्य च संख्यापरिमाणयोः स्वीकारे गौरवात्तयोरयोग्यत्वमिति वाच्यं। मनःसंयुक्तस- राम
मवायेन विजातीयगुणं विनापि आत्मत्वमानसजननात्तद्विजातीयगुणस्याविशेषसामग्रीत्वासंभवेन सामान्यसामग्रीव- २७
त्वात् संस्कारादिज्ञानापत्तिवारणाय विजातीयगुणाभेदत्वेन हेतुताया आवश्यकत्वात्। आत्मत्वमानसे आत्मत्वत्वेनापि

हेतुत्वं कल्पयित्वा सामान्यसामग्र्याः फलेऽजननान्वयो विजातीयगुणात्मत्वयोरन्यतरस्य सहकारित्वकल्पनेन संस्कारप्र-
त्यक्षापत्तिवारणे लाघवमिति गौरवात् तद्रूपेण स्याद्विजातीयगुणाभेदत्वेन कारणत्वमपास्य वैचित्र्यादिति यः प्रत्यक्षलौकिकत्वे वि-
नेत्यस्य साक्षात्कारत्वेनेन सूचितः इत्यपि विति॥ आत्मनः आत्मसमवेतगुणानां च मानसयोग्यत्वे इत्यर्थः॥ यथात्मा। पुरुष-
तरीयात्मानद्गुणाश्च यथात्मसमवेतगुणाश्चेत्यर्थः॥ चकारेण गुणसमवेतजात्यादीनां तदभावानां च संग्रहः। समाधत्ते न
तीति। यदा योग्यत्वात् पुरुषान्तरीयमनसोऽयोग्यत्वात्। आत्ममानसत्वावच्छिन्नं प्रति विजातीयमनःसंयोगत्वेनात्मसमवेतमा-
नसं प्रति विजातीयमनःसंयुक्तसमवायत्वेन चैत्रात्मसमवेतसमवेतमानसत्वावच्छिन्नं प्रति विजातीयमनःसंयुक्तसमवे-
तसमवायत्वेनेत्यादिना कार्यकारणभावकल्पनात् पुरुषान्तरीयात्ममनसोः संयोगे चैवैजात्याभावप्रामेनेनतत्प्र-
त्यक्षापत्तिरिति भावः। महत्त्वेति। यथा मात्मादिविषु चक्षुःसंयोगसत्त्वादिति भावः। तेषां परमाणवादीनां। चक्षुर्योग्यत्वादिति।
चक्षुर्जन्यालौकिकसाक्षात्कारायोग्यत्वादित्यर्थः। यस्य यात्मना लौकिकचाक्षुषसामग्र्यसत्त्वादिति भावः। महदित्यादि॥ इदं
त्तिलौकिकविषयतासंबंधेन चाक्षुषं प्रति समवायेन महत्त्वेन रूपवत्वे द्रव्यत्वरूपत्वेन च हेतुत्वेनेत्यर्थः। परमाणौ महत्त्वाभावात् आ-

त.प्र. २८ ष्पनिरूपणाभावान्न पिशाचादेश्चो भूतरूपवत्त्वाभावान्ननन्वयत्वाभिमतत्वं तुल्यार्थः। नन्वेवं बाह्यापरमाणुष्वेत्यादि। तद्रूपस्या
पिशाचादिरूपस्यानुभूतत्वान्नतदुद्भूतत्वमितिचेत्त्वन्नायं पापिपिशाचादिशरीरस्यावयवावयवित्वेनतत्र रूपाभावान्नतद्रूपस्यानुभू
तत्वमित्याशयेनाह। तथाविपिशाचादिपदेनतन्निमित्तकारणावायवीयपरमाणुभागोबोध्यः॥ ननु त्वाचवाह्यजातीयवस्तुःसं
योगत्वेनैवद्रव्यवाह्यसंप्रतिहेतुत्वेपामात्वाहित्वम्बस्तुःसंयोगेवैजात्यानभ्युपगमात्तत्रतत्रसम्बन्धोपस्थितिरिति किं महदुद्भूत
रूपादिहेतुत्वेपात्। न च विजातीयवस्तुःसंयुक्तविशेषणतया त्वभावबाह्यप्रत्यक्षहेतुतया वायवीयेतुद्भूतरूपाभावप्रत्यक्षस्यानुरोधे
नैतन्नैवविजातीयवस्तुःसंयोगस्यावश्यकतया वायोर्वाह्यप्रत्यक्षापत्तिरिति तत्ररूपहेतुत्वमावश्यकमितिवाच्यम्। द्रव्यबाह्य
षजनकतावच्छेदकतयावैजात्यस्य तान्त्रिकाणामनायत्तत्वात् नैगीकारात्। न च तथापि विजातीयवस्तुःसंयोगस्य वस्तुत्वेऽपि म
त्त्वेन बाह्यप्रत्यक्षापत्तिरित्युद्भूतरूपहेतुत्वमावश्यकमितिवाच्यं स्वप्रतियोगिकसंयोगसम्बन्धेन द्रव्याभावेन च वस्तुविषयवस्तुः
प्रतियोगिकसंयोगाभावादिति चेन्न विजातीयक्रियायां पवनविजातीयसंयोगनियामकत्वेऽयं तैकपेयवस्तुःक्रियया
घटेपरमाणौ च युगपत्संयोगः तत्र परमाणाववीयविजातीयसंयोगस्य दुर्वारतया नत्वनत्वप्रत्यक्षापत्तेर्वारणासंभवात्। न च त राम २८

त्रद्वारदेशस्यापि विजातीयसंयोगनियामकत्वेन परमाणवादिरूपेद्वारदेशस्यत्वानियामकत्वाकल्पनेनेन नत्र विजाती
यसंयोगद्वतिवाच्यम्। अनेनोन्नारदेशानां विजातीयसंयोगनियामकत्वकल्पनापेक्षया महदुद्भूतरूपहेतुताभ्युपगमौचित्यादिति
दिक्। एकैकेत्येनेमात्सवासाचितः। महदुद्भूतत्वस्य जातित्वेनीलत्वादिना संकरप्रसंगात्। न च नीलत्वादिव्याप्यानानैवोद्भूतत्वमि
तिवाच्यम्। तथासतिनित्यवस्तुत्वावच्छिन्नप्रतिद्भूतरूपत्वेनकारणत्वानुपपत्तेः। कारणतानंनुगमेनव्यभिचारादिति। अनुद्भूतत्वेति
। न च नीलत्वादिनासंकर्यमत्रापीतिवाच्यं नीलत्वव्याप्यनानानुद्भूतत्वस्वीकारेणाननुगमात्। अनुद्भूतत्वाभावकूटविशिष्टरूप दि
त्वेन च प्रत्यक्षं प्रतिहेतुत्वेन व्यभिचाराभावादितिभावः। प्रसंगात्सर्वस्तुवैज्यवानुगतानाहत्यायोग्यगुणात्वादिनायोग्यद्रव्यरूपमिति।
वस्तुयोग्यद्रव्यवृत्तिरूपमित्यर्थः॥ तन्मात्रेति। योग्यद्रव्यमात्रवृत्तीत्यर्थः। ननु तन्मात्रवृत्तीत्यत्रमात्रपदमनर्थकमित्यतआ
ह। मात्रपदमिति। घटाकाशसंयोगस्याकाशेऽपि वृत्तित्वात् योग्यद्रव्यमात्रवृत्तित्वमितिभावः। ननु त्वाचप्रत्यक्षे त्वक्संयोगस्य
हेतुत्वात् परमाणुवायुप्रभृतीनां स्पार्शनापत्तिरितिलिंगिं द्वयोर्योग्यत्वमेव द्रव्यत्वाचप्रत्यक्षेहेतुरिति वाच्यम् तत्र किं तद्योग्यत्वमिति
दृष्टिस्तु शेका योग्यमहत्त्वं वृत्तिः। महदित्यादि। तथा च उद्भूतवृत्तित्वे लौकिक विषयतासंबन्धेन त्वाचप्रत्यक्षं प्रति महत्त्वेनोद्भूतस्प

शीत्वेन च हेतुत्वान्न तत्र सत्त्वस्यापत्तिरिति भावः। सामान्यतः बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति तु उद्भूतरूपत्वेन हेतुत्वान्न तत्राव प्र
त्यक्षे विरूपे हेतुत्वेन न वायोः प्रत्यक्षमिति द्रष्टव्यं। यथा चक्षुःसंयोगात्परमाणोरपि प्रत्यक्षं स्यादिति तेनेत्यादि न्याय। प्रभायामिति। न च प्र
भादि तेजसो रूपवत्त्वेन तत्प्रभायां रूपवत्त्वमेव न तु द्रव्यत्वमिति वाच्यं नष्टमप्रतानुसारेणोनष्टरूपत्वादिति प्रभेत्यानेत्वांगादि
यवोग्यतानुमानात्। गुणत्वश्चेत्यादिना त्वचो योग्यत्वादिति शेषः। सुषोयोग्यस्य रूपस्याविलवाग्रहणात्प्रसंगात् द्रव्यतिरिक्ता इति
। महदुद्भूतस्पर्शवन्मात्रेति। तन्मात्रवृत्तित्वं वाद्वितरावृत्तित्वे सति तद्वृत्तित्वं॥ महदुद्भूतस्पर्शश्चेति। सामानाधिकरण्ये
न महत्त्वविशिष्टोद्भूतस्पर्शश्चेत्यर्थः न तु चक्षुषो योग्यत्वादिति यदर्थमनतस्महा। अनयेवेति। अनयोः चक्षुर्योग्यत्वविशेषणा
द्वाकाविति। वायुपरीमाणस्य चक्षुर्योग्यत्वादिति भावः। ननु उद्भूतस्पर्शवत्त्वेन चक्षुर्योग्यगुणस्येवाप्रसिद्धत्वान्नैव
ते सत्त्वस्यापत्तिरारोहेत्तं महदित्यादिविशेषणोनेत्याह नवेति। तथा च। प्रभायाः परिमाणस्य च चक्षुर्योग्यत्वात्तस्यापि त्वाच प्रत्य
क्षापत्तिरतत्तद्विशेषणमावश्यकमेवेति भावः॥ न च चक्षुर्योग्यत्वविशेषणेनैव परिमाणगुणकालेऽत्रव्यवच्छेदमहदिति
विशेषणादेयर्थ्यमिति वाच्यं चतुरिणी माणस्पार्शनवारणाय प्रकृष्टमहत्त्वपरतया तदुपादानस्यावश्यकत्वात्तन्मात्रपद

व्यावृत्तिमाह। नकायवेति। उद्भूतस्पर्शवन्मात्रावृत्तित्वात्॥ उद्भूतस्पर्शवदितरावृत्तित्वात्॥ तथा च तदितरावृत्तित्वं तन्मा
त्रवृत्तित्वं तस्येति भावः। तत्राहि। प्रभायोहि। कथमेवेति। तत्योग्यद्रव्यसमवेतत्वकत्वरूपयोग्यत्वमित्यर्थः। कायोरपि स्पार्शनप्रत्यक्ष
त्वादिमते दर्शयति। मीमांसकादित्यादिना॥ त्वग्रहणात्॥ त्वाचप्रत्यक्षे रूपस्य हेतुत्वाकल्पनेनेत्वाग्रहणात्। महदिति। महत्त्ववि
शिष्टोद्भूतरूपमित्यर्थः। तत्प्रयोजकत्वात्समवायस्य प्रयोजकं। गौरवात्तत्प्रभायाः स्पार्शनवारणाय उद्भूतस्पर्शस्य हेतुत्वावश्यक
तया त्वाचप्रत्यक्षं प्रति रूपस्य हेतुत्वे गौरवात्। अन्तरिति। उद्भूतरूपस्य त्वाचप्रत्यक्षाप्रयोजकत्वादित्यर्थः। बहिरिन्द्रियेति॥
आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिन्द्रियजन्यत्वनिवेशः। अन्तरप्युनिन्दस्साधारण्यमिति भावः। तदभावात् उद्भूत
रूपाभावात्। नैवमिति। न वायोः स्पार्शनप्रत्यक्षमिति भावः। लाघवादिति। बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारत्वापेक्षया
द्रव्यचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वे लाघवादित्यर्थः। अत्र मीमांसकानामयमाशयः। आत्मप्रत्यक्षे व्यभिचारवारणा
य बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवात् उद्भूतरूपस्य कार्यतावच्छेदकं वाह्यद्रव्यप्रत्यक्षत्वं वाच्यं।
तेन च बहिः अात्मा मत्वं वा मानसविषयात्मत्वे वेति विनिगमनाविरहः। अथ मूर्तप्रत्यक्षत्वमेव तत्कार्यतावच्छेदकं

स्पर्शसमवायिकारणतावच्छेदकतया च मूर्त्तत्वं जातिरिति चेन्न तथापि प्रभायाः स्पार्शनकारणीभूतस्पर्शस्य स्पार्श
नं प्रति हेतुत्वावश्यकतया चाक्षुषत्वमिव तज्जन्यतावच्छेदकमुपेयते न तु प्रत्यक्षत्वं। वायोः प्रत्यक्षत्वे हेतुत्वेन तत्संसर्गसंदिग्ध
व्यभिचारकत्वात् तदुक्तं पद्मनाभमिश्रैर्न निश्चितव्यभिचारकं हेतुं प्रमाणाव्यभिचारकेण कार्यत्वेकल्पनीया प्रत्याह
ति। तथा च वायोः स्पार्शने बाधकाभावः। साधिकारं च समारोपयन्ते होपि हरन्तीत्याहुरित्यातीतिः। न चाद्भूतस्पर्शनवायो
रनुमानाज्ञातादृशप्रतीत्यनुपपत्तिरिति वाच्यं। व्याप्यादिप्रतिसंधानं विनापि तादृशप्रतीतेर्जायमानत्वात्। अन्य
था घटे स्पर्शप्रमितिप्रतीतेरनुमानादिनैवोपपत्तौ घटादौ नामपि स्पार्शनोच्छेदापत्तेरिति। अत्राहुर्नैयायिकाः। का
रणाभावात्कार्याभाव इति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वात् न च मूर्त्तप्रत्यक्षत्वावच्छिन्नं
प्रति उद्भूतरूपत्वेन हेतुत्वे प्रत्यक्षसामान्याभावे उद्भूतरूपाभावस्य उद्भूतस्पर्शाभावस्येति विशेषाभावकूटस्य प्रयो
जकत्वं वाच्यमिति गौरवं। मन्मते चोद्भूतरूपाभावस्येति लाघवं उद्भूतरूपत्वेन कारणत्वे च तदवच्छिन्नाभावस्य
प्रयोजकत्वाभावात् तत्साधनत्वमावश्यकमेव नन्तु नहि उद्भूतस्पर्शत्वेन हेतुत्वमाहत्यविनिगमनाविरहात् अव

न्नेकाघोरिव मन्मतेपि प्रभायाः प्रत्यक्षानंगीकारादिति चेन्नाद्भूतरूपीदृशो विहंगम इति तत्र प्रभामंडलस्यैकोपीदृश
तया तस्य वत्प्रत्यक्षानंगीकारे इह विहंगम इति प्रतीत्यनुपपत्तेः। संयोगप्रत्यक्षे चावयवप्रत्यक्षस्य हेतुत्वात्। एवं सं
योगविभागलिंगकं वेद्दु तादृशदेशानुमानेन तस्यात्वात्। न च पूर्वोत्तरदेशयोः संयोगे दृष्टत्वेभावानुपलंभात्मकं संयोगवि
भागयोरनुमानात्ताभ्यां तत्रानुमानमिति वाच्यं। प्रभामंडलद्वयोः भवन्मते प्रत्यक्षत्वात्। तस्मात्प्रभायाश्चाक्षु
षाणीकारस्यावश्यकत्वादुद्भूतस्पर्शत्वेन कारणत्वासंभवः। न च मूर्त्तप्रत्यक्षत्वस्य निरसाधारणात्कार्यजन्म
तावच्छेदकत्वमिति वाच्यं। समवायकालिकविशेषणतोभयसंबंधेन प्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वात्। एवं चान्या
स्तिष्वे कार्यकारणभावे वायोरूपाभावेन न तस्य प्रत्यक्षमिति। वायुर्न तीति प्रतीतिरनुमानादिनैवोपपादनीया। घटा
दौ चोद्भूतरूपवत्त्वेन तत्प्रतीतेः प्रत्यक्षत्वमेवेति। ननु त्वगिन्द्रियघटसंयोगस्पार्शनकारणतावच्छेदकजातीयस्य स्पार्शनं प्रति स
मानाधिकरणसंबंधेन स्पार्शनाभावस्य प्रतिबंधकत्वावश्यकतया वायोः स्पार्शने वायुस्पर्शस्पार्शनानुपपत्तेः य
त्वक्संयुक्त स्पार्शने व्यभिचारकारणतावच्छेदकजातीयत्वानिवेशः। नेत्रसंयोगे द्रव्यचाक्षुषं तं गुणकर्मसाधारणं। न च प्रतिव

त.प्र. ३१

धकतावच्छेदककोटौ विजातीयसत्तिस्पर्शाभावत्वनिवेशान्नानुपपत्तिरिति वाच्यं तथा सति विजातीयसत्वस्पर्शाभावत्व
योर्विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात् एवं त्वक्संयुक्तसमवायघटितसामान्यसामग्र्याः स्पार्शनाभावाभाव
रूपकारणतां विनापि वायुस्पर्शस्पार्शनजननात् स्पर्शविशेषसामग्रीत्वासंभवेन त्वक्संयुक्तसमवायसामान्यसामग्रीवत्वा
द्गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वाच्च न च स्पर्शस्पार्शने प्रतिस्पर्शत्वेनापि हेतुत्वकल्पे विना सामान्यसामग्र्या द्र
व्यसमवेतस्पार्शनत्वावच्छिन्नजननीयस्पार्शनाभावाभावस्पर्शयोरन्यतरस्य सहकारित्वकल्पनान्नानुपपत्तिरि
ति वाच्यं तथा सति प्रतिबन्धकतावच्छेदककोटौ स्पर्शाभावत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च वायोः प्रत्यक्ष
त्वानङ्गीकारे गौरवादिति वायुप्रत्यक्षस्वीकारपक्षो वितर इति चेन्नैवं सति शरीरप्रतिबन्धकाभावं विनापि त्वक्संयुक्तसम
वायेन द्रव्यत्वस्पार्शनजननात् स्पर्शविशेषसामग्रीत्वासंभवेन सामान्यसामग्रीवत्वाद्गगनघटसंयोगस्पार्शनापत्ते
र्दुर्वारत्वात् संनिकृष्टस्पार्शने प्रति संनिकृष्टत्वेनापि कारणत्वं कल्पयित्वा सामान्यसामग्र्याः फलजननोपेतादृश राम ३१
प्रतिबन्धकाभावसंनिकृष्टयोरन्यतरस्य सहकारित्वकल्पनान्नानुपपत्तिः गौरवात् तादृशे स्पर्शाभावघ

टसंयोगस्पार्शनवारणाय स्पार्शनाभावविशिष्टविजातीयसत्वेनैव तादृशत्वेन प्रतिबन्धकत्वोचितत्वात् विजातीयसत्वे
स्पार्शनाभाववैशिष्ट्यं च सामानाधिकरण्यघटितसामानाधिकरण्यसंबन्धेन न च विजातीयसत्वस्पार्शनाभावयोर्वि
शेषणविशेष्यभावे विनिगमनाविरह इति वाच्यं। विजातीयसत्वविशिष्टस्पार्शनाभावत्वेन प्रतिबन्धकत्वे सामा
नाधिकरण्यस्यैव प्रतिबन्धकतावच्छेदकसंबन्धतया गौरवात् स्पार्शनाभावविशिष्टविजातीयसत्वेन प्रतिबन्धकत्वे तु ता
दात्म्यस्यैव प्रतिबन्धकतावच्छेदकतया लाघवात् प्रतिबन्धकतावच्छेदकं च स्पर्शान्यस्पार्शनत्वं तेन वायोः प्रत्यक्षत्वे विन
ष्टस्पर्शस्पार्शने व्यभिचारः। न च तादृशप्रतिबन्धकाभावं विनापि वायुस्पर्शस्पार्शनजननात् स्पर्शविशेषसामग्रीत्वासंभवेन
सामान्यसामग्रीवत्वाद्गगनघटसंयोगस्पार्शनापत्तिरिति वाच्यं स्पर्शस्पार्शने प्रतिस्पर्शत्वेनापि हेतुताकल्पनेन सामा
न्यसामग्र्याः फलजननीयस्पर्शे तथाविधप्रतिबन्धकाभावयोरन्यतरस्य सहकारित्वोपगमात् न च प्रतिबन्धकतावच्छेदककौ
टौ स्पर्शाभावत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च वायोः प्रत्यक्षत्वानङ्गीकारे गौरवात् वायुप्रत्यक्षतास्वीकारपक्षो वि
तर इति वाच्यं। वायुप्रत्यक्षत्वानङ्गीकारे प्रकारान्तरेण लाघवासंभवात् तेन यद्यपि परमाणवादिघटितसंनिकर्षवत्वात् द्र

न.प्र. लस्पार्शनवारणाय द्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनत्वस्य समवायत्वेन हेतुत्वं वाच्यं। तत्र च रत्नगुरुकस्पार्श
३२ नेव्यभिचारवारणाय द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वं कार्यतावच्छेदकमुपेयं। तस्य च सान्निध्ये द्रव्यसमवेतस्पार्शनत्वस्य कार्य
तावच्छेदकत्वमादाय विनिगमनाविरहः। वायोरप्रत्यक्षत्वेन तु वायुस्पर्शस्पार्शने व्यभिचाराद् द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वस्य
कार्यतावच्छेदकत्वासंभवेन सान्निध्ये द्रव्यसमवेतस्पार्शनत्वस्यैव कार्यतावच्छेदकतया विनिगमनाविरहासंभवात्। तन्नैव
वमसन्निकृष्टगुणकर्मस्पार्शनापत्तिरिति वाच्यं। एकत्वस्य यद्यपि तत्सन्निकर्षो न हि त्वाद्देशस्य प्रत्यक्षकारणतापरिज्ञाता। यस
स्पार्शनं प्रति सामानाधिकरण्यसंबन्धेन त्वक्संयोगाभावस्य प्रतिबन्धकत्वस्वरूपकतया तेनैव सन्निकृष्टगुणकर्मस्पार्श
नापत्तिवारणासंभवात्। तन्नैवं त्वक्संयुक्तसमवायहेतुतायामेवकोऽभावः। येन तत्कार्यतावच्छेदके विनिगमनाविरहो
वायुप्रत्यक्षतावादिमतेऽप्रसज्येतेति वाच्यं। असन्निकृष्टद्रव्यत्वादिस्पार्शनवारणाय त्वक्संयुक्तस्पार्शनत्वस्य समवायत्वे
न सान्निध्ये द्रव्यसमवेतस्पार्शनत्वावच्छिन्नप्रतिहेतुतायां तेनैव द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादायविनिगमनावि राम
रहः। वायोरप्रत्यक्षत्वेन वायुस्पर्शस्पार्शने व्यभिचारात्। वायुप्रत्यक्षत्ववादिमते तु द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादा ३२

यविनिगमनाविरहेणानंतगुरुत्वभेदभिन्नानंतसान्निध्याख्यहेतुत्वकल्पनापत्तेर्वायोरप्रत्यक्षत्वलोभीकार एवोचितः। एतन्मते
उत्कृष्टरूपेणास्य केवलसत्तानिवेशेन स्पर्शत्वेन हि तां हेतुत्वं हेतुत्वकल्पनेन च क्रियद्गौरवसंभवे विगुरुत्वभेदभिन्नसन्निक
र्षहेतुत्वकल्पनाविरहपात्रद्वयानपादिनिमित्तोनानुपपत्तिर्यथा। न च वायुत्वस्य सन्निकृष्टद्रव्यत्वस्पार्शनवारणाय गुरुत्वभे
दभिन्नसन्निकर्षहेतुत्वं नोपेयते। अपि तु सान्निध्ये द्रव्यसमवेतस्पार्शनं प्रति त्वक्त्वावच्छिन्नप्रागभावप्रतियोगित्वविशिष्टेयत्त्वाव
च्छिन्नस्पार्शने विषयतासंबन्धेन तद्द्रव्यसमवेतत्वसंबन्धेन कृतित्वेनैव कारणत्वं स्वाहमित्त्वं कालिकसंबन्धेनाखण्डं वा
गुणप्रत्यक्षत्वसाकाङ्क्षगुरुत्वभेदभिन्नसान्निकर्षहेतुतायां न कार्यतावच्छेदकेऽपदर्शितगौरवस्यानवकाशः। न चैवं तु लस्येवा
ऽकल्पनेनानन्तकृतिकार्यतावच्छेदके द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहसंभव इति वाच्यं। भवन्म
तेऽस्पार्शमत्वनिवेशेन स्पार्शत्वेन हेतुत्वकल्पनेन च गौरवस्यातिस्फुटत्वात्। वस्तुतस्तु व्यापकधर्मेण कारणतायाः द्वव कार्य
तायाः अपि व्यापकल्पनात् द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वेन कार्यतावच्छेदकत्वासंभवात् सान्निध्ये स्पार्शनत्वस्यैव वायुप्रत्यक्षतावा
दिमतेऽपि सन्निकर्षकार्यतावच्छेदकत्वात् इत्याहुः। वस्तुतस्तु गुरुत्वाद्यतीन्द्रियप्रत्यक्षवारणाय तेषां तत्तद्धर्मिकत्वेन प्रतिबन्ध

न.प्र. ३३ कल्वेगौरवं लाघवेन विषयत्वेनैव लौकिकप्रत्यक्षहेतुत्वं विषयत्वं च लौकिकविषयतया साक्षात्कारत्वमेवान्तथा च तेन
वागगनघटसंयोगस्पार्शनवारणेन तदनुरोधेन विजातीयमतस्पार्शनं प्रतिस्पार्शनाभावप्रतिबंधकत्वमितितिन वायुस्पर्शस्पा
र्शानुपपत्तिः। नचैवं विषयत्वाभावादेव नीरूपप्रत्यक्षवारणे रूपहेतुत्वमनावश्यकमितिवाच्यं। घटादेः पाकादिनानीरूपता
दशायां लौकिकप्रत्यक्षतापत्तेः रूपहेतुत्वस्यावश्यकत्वादित्यलमनल्पजल्पनेन। समवायानींद्रियत्ववादिवैशेषिकमतेदूष
यितुं तन्मतमुपन्यस्यति। वैशेषिकास्त्विति। नप्रत्यक्षः। नेंद्रियजन्यलौकिकसाक्षात्कारविषयः। संबंधप्रत्यक्षेइति। संबंधत्व
स्य समवायसाधारणत्वादितिभावः। ननु तादृशकार्यकारणभावकल्पने मानाभाव इत्यत आह कथमन्यथेति। अन्यथा ताद
शकार्यकारणभावाकल्पने। नप्रत्यक्षइति। तथा च चक्षुःसंयुक्तसमवायरूपकारणसत्वेन द्रव्यसमवेतत्वं चाक्षुषापत्तेरितिभावः।
नचेति। नहीत्यर्थः। तथाहेतुताया इति संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षत्वेन हेतुताया इत्यर्थः। घटाकाशसंयोगप्रत्यक्षा
पत्तिरेवमानमित्याशंक्य निराकरोति। नचेत्यादि। योग्येति। द्रव्यत्वादिजातेर्योग्यसमवेतत्वाभावाद्योग्यत्वेन स्यादतो गुणेति राम
योग्यत्वादिति। घटाकाशसंयोगस्य चायोग्याकाशवृत्तित्वेनायोग्यत्वादितिभावः। ननैवं वायुस्पर्शस्य वृक्षस्य च प्रत्यक्षं न ३३

स्याज्जयोरयोग्यत्वादित्यत आह किंचेति। लाघवादिति। संबंधप्रत्यक्षत्वावच्छेदेन लाघवात्। लाघवमेवाह। संबंधत्वं हीति
संयोगत्वस्य जातिरूपतया लाघवमन्यथा वेतिभावः। घ्राणग्राह्यगुणमाह। घ्राणग्राह्यइति। तद्धर्मे गंधगतसामान्यं गंधत्वादि-
तयोः। गंधागंधत्वयोः। अत एव गंधेसुरभित्वासामानाधिकरण्यविशेषणादेव उद्भूतत्वविशेषणस्यापि व्यावृत्तिमाह नचेति। रसन
योग्यगुणमाह रसनेनेति। अग्राह्यगुणमाह अत्रवतोति। ननु चक्षुरादीनां द्रव्यग्राहकत्वे निमीलितनयनस्यापि चाक्षु
षापत्तिरित्यत आह तस्यैवेति सन्निकृष्टार्थमात्रग्राहकत्वात् असन्निकृष्टार्थाग्राहकत्वादिति यावत्। सहकारितो। प्रत्यक्षे
जननीये अपेक्षणीयाः। तथा चेंद्रियसंयोगादेरपि प्रत्यक्षहेतुतया निमीलितनयनस्य प्रत्यक्षापत्तिरिति भावः। ननु
इंद्रियत्वस्य तेजस्त्वादिना सांकर्यात् जातित्वासंभवेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति इंद्रियत्वसंयोगो हेतु
त्वमिति चेन्न इंद्रियनिष्ठैककार्यजनकत्वज्ञानं स्वोत्पन्नविजातीयैककार्यकरणत्वेनैव तद्धेतुत्वोक्तौ। नचैवं चक्षुःसंयोगदशायां स्पा
र्शनवारणाय त्वक्संयोगदशायां चाक्षुषवारणाय च चक्षुस्त्वक्संयोगयोश्चाक्षुषस्पार्शनहेतुत्वावश्यकत्वेंद्रिय
संयोगादेः प्रत्यक्षसामान्यहेतुत्वे मानाभाव इति वाच्यं [illegible] प्रत्यक्षसामान्यानुत्पादे चक्षुःसंयोगाभाव

त.प्र. त्वक्संयोगाभावकालीनं प्रयोजकत्वे गौरवात् लाघवेनेन्द्रियसंयोगाभावस्यैव प्रयोजकत्वेनेन्द्रियसंयोगत्वेन हेतुत्वाव
३४ श्यकत्वात्। स्फुरणागतिविरहस्य कार्यविरहाप्रयोजकत्वान्नेन्द्रियसंयोगस्य संयोगेनेन्द्रियस्य का हेतुत्वमिति विनिग
मनाविरहादिन्द्रियत्वेनापि तत्त्वेन हेतुत्वमिति। ननु सर्वेषामेव सन्निकर्षाणां द्रव्यादिग्राहकत्वे आत्मनः प्रत्यक्षानुपपत्तिः
। तत्र संयुक्तसमवायाभावात्। एवं रूपादेरपि तत्र संयोगाभावादिति प्रत्येकमेव द्रव्यादिग्रहे फलाभावात्तत्रैकेनाकिंच
त्करत्वमिति पृच्छति अस्यैकेनेति। संयुक्तसमवायस्य गुणाभावग्राहकत्वे शब्दग्रहो न स्यात् स्वस्मिन् स्वप्रतियोगिकसंयोगा
भावेन श्रोत्रसंयुक्तसमवायस्य शब्देऽसत्त्वादत आह शब्देनेति। जातिं द्रव्यत्वादिः। संयुक्तसमवेतसमवायस्य शब्दत्वे
ऽसत्त्वाच्छब्दत्वग्रहानुपपत्तेः शब्देनानुगतानिति। शब्देनेति निगुतावि शेषणं। तत्र समवायेऽभावे वा तथा चैवं पञ्चविधस
न्निकर्षाभावेनाविशेषणतयैव तद्ग्रह इति भावः। तत्र शब्दाभावस्येत्यर्थः। स्पर्शे च तत्त्वग्रहाभावस्येत्यर्थः। ननु इन्द्रिय
सन्निकृष्टविशेषणता। इन्द्रियसंयुक्तविशेषणतां तथा च रूपादौ सत्त्वाभावग्रहानुपपत्तिरत आह इन्द्रियसन्नि राम
कृष्टेति। षड्विधेति। इन्द्रियसन्निकृष्टविशेषणता इन्द्रियसंयुक्तविशेषणता इन्द्रियसंयुक्तसमवेतविशेषणतेत्यादि ३४

ति। स्पर्शादेः। इन्द्रियसंयुक्तसमवेतविशेषणतेत्याह रूपादेरिति। सत्त्वाभावग्रहे समवायानुपपत्तेरिति भावः। रूपत्वेति। सं
युक्तसमवायादिरिति। इहेनैव षड्विधत्वात्। ननु रूपादिग्रहार्थमवश्यमभ्युपेतया संयुक्तसमवायप्रत्यासत्त्यैव घटादिग्रहोप
पत्तौ त्वक्संयोगस्य प्रत्यासत्तित्वेनोपाशंकते नान्वेति। न प्रत्यासत्तिः न द्रव्यग्राहकप्रत्यासत्तिः। मानाभावादिति शेषः। ननु
घटादिग्रहान्यथानुपपत्तिरेव मानमत आह संयुक्तेति। तत्संभवात् संयुक्तसमवायसंभवात् ततस्य आत्मनः। तथा चात्म
प्रत्यक्षे संयोगहेतुतायाः आवश्यकत्वेन तत्रैव द्रव्यप्रत्यक्षत्वमेव तज्जन्यतावच्छेदकमुपेयतेरिति भावः। ननु द्रव्यसमवेत
चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायहेतुत्वेन तत एवोपपत्तेरलं चक्षुःसंयोगहेतुत्वेन। यदि वात्मप्रत्यक्षे
ऽपि प्रत्यगात्मा मानसतो द्रव्यप्रत्यक्षत्वमेव जन्यतावच्छेदकमुररीकृत्यैतेन तदा सम्बन्धप्रत्यक्षत्वमेव तथास्तु न च सम्बन्धप्रत्यक्षत्वस्य
तथात्वे रूपादिचाक्षुषानुपपत्तिरिष्यत एवानुपपत्तिरेवेत्तत्र बाधकमिति वाच्यं। तथा सति चक्षुःसंयुक्तसमवायेनैव घ
टादिचाक्षुषोपपत्तेर्द्रव्यप्रत्यक्षत्वं जन्यतावच्छेदकं साधकाभावस्य प्रकृते बाधकत्वादित्यत आह संक्षेप इति। चक्षुःसंयुक्त
समवायस्य घटाकाशादिरूपेऽपि सत्त्वान्न चाक्षुषापत्तेश्चक्षुःसंयुक्तचाक्षुषवन्निरूपितसमवायत्वेन तद्धेतुत्वं। चो॥ तत्र

त.प्र.
३५

त्रुटिचाक्षुषे व्यभिचारवारणाय द्रव्यान्तरस्याचाक्षुषत्वस्य विजातीयसत्त्वासम्भवेऽपि सत्त्वस्य चाक्षुषज्ञानकावच्छेदकत्वमुपेयाम् एवं च त्रुटिचा
क्षुषस्यासंभवाहीनतया चक्षुःसंयोगहेतुत्वव्यवस्थापकाभावात् इह इंसंयोगप्रत्यासत्तेरिति। प्रमाणाभावादेव महत्त्वे नाशास्त्रीति प्रत्ययान् त
मानाभाव घटे आलोको नास्तीति प्रत्ययान् घटेऽपि चक्षुःसंयोगस्यावश्यकत्वाच्चक्षुःसंयोगविशेषणतायां एकाभाव
यां हेतुत्वादिति भावः। महदुद्भूतेति। महत्त्वविशिष्टोद्भूतरूपविशिष्टालोकनिरूपितसंयोगः द्रव्यचाक्षुषप्रत्यक्षे
कारणमित्यर्थः॥ महदिति। महदुद्भूतरूपालोकसंयोगेत्यर्थः। न चैवमिति। एवं आलोकप्रतियोगिकसंयोगस्य हेतुत्वे
तेजःसंयोगाभावात्। तेजोन्तरप्रतियोगिकसंयोगाभावान्नात्रस्मिन्नस्त्प्रतियोगिकसंयोगानभ्युपगमादिति भावः। त
स्य भाग्रहादप्रमाणादिप्रमाणां दोषसंयोगस्यैव सत्त्वात्। तेनेमानिप्रमाहादिति। महतोः पार्थिवत्वेनेतत्संयोगस्याहेतुत्वादि
ति भावः। ननु महतिप्रभाहेतौ सौरालोकसंयोगस्यैव सत्त्वात् तत्राह दृश्यत इति। महान्धकारेऽस्त्येतेन सौरालोकव्यवच्छे
दः। अन्धकारे घटादिप्रत्यक्षापत्तिवारणाय स्वालोकसंयोगस्य हेतुत्वमावश्यकम्॥ आलोकप्रत्यक्षे हेतुत्वं न त्वेतुत्वे मानाभा राम
वः। अन्धकारे वितत्यस्तस्मद्योऽत्राह तत्र आलोकभिन्नद्रव्यचाक्षुषलौकिकप्रत्यक्षे तस्य हेतुत्वमतो न व्यभिचार इत्याशं ३५

कते अथेति। सुवर्णेति। सुवर्णस्यालोकभिन्नत्वाभावेन तच्चाक्षुषस्यालोकसंयोगकार्यतावच्छेदकानाक्रान्तत्वादि
ति भावः। आलोकसंयोग इति आलोकनिष्ठसंयोगो हेतुरित्यर्थः। यत्रालोकप्रतिभूतले घटस्तत्रानीतस्तत्रालोकप्रतियो
गिकसंयोगाभावात् आलोकहानिसंयोगत्वेनैव हेतुत्वादिति भावः। तस्मिन्नालोकसंयोगस्य हेतुत्वादालोकालोकभिन्नो
भयवृत्तित्वात्। एवं तु अन्धकारस्थालोकसंयोगस्यालोकेऽपि सत्त्वात् सुवर्णेति। तत्राप्यालोकाकाशसंयोगस्य सत्त्वादिति भावः।
अनभिभूतेति। अनभिभूतरूपवस्येति युक्तत्वात् अनभिभूतरूपविशिष्टालोकसंयोगस्य हेतुतया सुवर्णेतरसंभवः। सु
वर्णरूपस्याभिभूतत्वात्। तथा च द्रव्यचाक्षुषलौकिकं प्रति अनभिभूतोद्भूतरूपविशिष्टालोकसंयोगस्य हेतुत्वमिति
भावः। अन्यथा सुवर्णरूपस्यानभिभूतत्वे दृश्यतेति। अन्धकारे घटादौ सुवर्णसंयोगान्न घटग्रहापत्तेरिति अभिभूतत्वं
तस्येति भावः। वस्तुतस्तु जातिविशेषग्रहणे तत्र गुरुत्वाभिभव इति। संप्रदायविदस्त्विमाहुः। आलोके तादृशद्रव्यचाक्षुषे आ
लोकसंयोगस्य हेतुत्वे अन्धकारे सुवर्णसाक्षात्कारापत्तिरिति तत्सुवर्णाभिन्नत्वमालोकविशेषणं। तथा च सुवर्णाभिन्नं
यत्तेजस्तद्भिन्नद्रव्यं सुवर्णघटादि चेत्यत्र आलोकप्रतियोगिकसंयोगो हेतुः। अतो नान्धकारे सुवर्णसाक्षात्कारः

त॰प्र॰ ३६

त्वात्तुल्यार्थः। कार्यतावच्छेदके गौरवमप्रामाण्यम्। केचित्तु द्रव्यचाक्षुषे आलोकसंयोगस्य प्रभासंयोगत्वेनैव हेतुता। प्रभा
त्वं च मणिरत्नादिव्यावृत्तं जातिविशेषः। सुवर्णसंयोगादिव्यावृत्ते तेजोमात्रमुद्भूतरूपविशिष्टं तेजस्त्वमिति यावदालोकसंयोगत्वेनैव हेतुत्वमित्यपि के
चित्। आलोकसंयोगानवच्छेदकावच्छेदेन चक्षुःसंयोगे घटादिग्रहापत्तिः। तत्रालोकसंयोगस्य चक्षुःसंयोगस्य च परस्प
रानवच्छेदकावच्छेदेन सत्त्वादित्याशंकते तथापीति। न यद्यपि आलोकसंयोगो हेतुस्तथापि परस्परानवच्छेदेन तद्ध
पुत्तेरिति। आलोकावच्छेदकोऽर्थः। एकदेशेनेति। एतदवच्छेदेन चक्षुःसंयोगस्तेनैव विशेषः यदवच्छेदेनेति। आलोकसंयो
गावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वमिति भावः। अथ मूर्त्तयोः समानदेशत्वविरोधात् घटादौ एकावच्छेदेन सं
योगसंबंधेनालोकचक्षुषोस्तत्र कथमालोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगः कथमुत्पद्यत इति चेत्तन्न विभुद्वयो
रेव मूर्त्तयोः समानदेशत्वानंगीकारात्। आलोकचक्षुषोः तैजसत्वेन निविडतुल्यभावात्। न च तत्रोपयालोकसंयोगस्य राम ३६
कारणतावच्छेदककोटिप्रविष्टत्वादकारणत्वमिति वाच्यं। तादृशचक्षुःसंयोगत्वेन चक्षुःसंयोगावच्छेदकावच्छिन्नालो
कसंयोगत्वेन वा हेतुत्वमिति विनिगमनाविरहेण तस्यापि कारणत्वात्। न चालोकसंयोगं विना पिण्डितालोके सांजनचोरादेः

प्रतिबंधकोऽप्रत्यक्षो यात्कथं तस्य कारणत्वमिति वाच्यं। विजातीयचाक्षुषं प्रत्येवालोकसंयोगस्य हेतुत्वादित्यादिसां
जनपुरुषीयचाक्षुषं प्रत्येवैतदिति तन्मिति। केचित्तु अंजनाभावविशिष्टालोकसंयोगाभावत्वेन द्रव्यचाक्षुषं प्रत्यालो
कव्यवहितं प्रतिबंधकत्वेन तदभावत्वेन च कारणता। अंजनाभावश्च स्वसंयुक्तचक्षुःसंयोगित्वसंबंधावच्छिन्नप्रतियोगिताकः।
आलोकसंयोगाभावे अंजनाभाववैशिष्ट्यं च सामानाधिकरण्येन। आलोकसंयोगाभावश्च स्वसमानाधिकरणालोकत्व
संबंधावच्छिन्नप्रतियोगिताकोऽतो ध्वान्ते न संयोगस्याव्याप्यवृत्तित्वेऽपि न क्षतिः। स्वविशिष्टाभावः क्वचिद्विशेषणाभा
वप्रयुक्तः क्वचिद्विशेष्याभावप्रयुक्तः। सांजनपुंसः अंजनाभावविरहप्रयुक्तो विशिष्टाभावः। आलोकसंयोगस्थले
च आलोकसंयोगाभावविरहप्रयुक्त इत्युभयत्रापि प्रतिबंधकाभावसत्त्वमेवात्र हेतुत्वाद्वा व्यभिचारवा
रणाय चतस्पृष्टीयत्वेन विशेषणीयमित्याहुः। समवायाभावग्रहार्थं मेयविशेषणतो प्रमाणसन्निकर्षं तु नैव तु समवाया
भावयोः प्रमाणासत्त्वे एव संभवतीति तद्वानेत्याशंकते। स्यादेतदिति। समवायाभावग्राहकत्वेनैव तत्संयोगसन्निकर्षस्यादत
आह समवायेति। प्रमाणासत्त्वे कथं तयोः सत्त्वमत आह नेदमिति। तथा च प्रमाणाभावस्य प्रमेयाभावव्याप्यत्वात्तयोरस

त.प्र. ३७

त्वमिति भावः। ननु स्वं घट इत्यादिप्रत्यक्षं घटघटत्वयोः संबंधविषयकं तत्र च समवायातिरिक्तसंयोगादीनां बाधात्सम

वायसिद्धिः। नित्याचेतना बाधस्य कुतः प्रत्यक्षप्रमाणस्यैव संबंधालक्ष्यप्रमाणाभावइत्याशंकते। स्वं घट इत्यादि। ननु समवा

यातिरिक्तस्यैव कस्यचित्संबंधस्य सत्त्वे तेन बाधइत्यत आह स्वरूपेति। तेषां घटत्वस्य स्वरूपत्वलभ्यादिः नाम संबंधः संयोगादि

समत्वादिरिति। तथा च समवायातिरिक्तस्याधाराधेयभावस्य स्वरूपसंबंधस्य सत्त्वात्तद्विषयकत्वेनैव प्रतीतेरुपपत्तेर्न तद

न्यथानुपपत्त्या समवायसिद्धिरिति भावः। न चाधाराधेयभावः समवाय इति पर्यायत्वमिति समवायेनेत्यत आह स्वरूपेति॥ पदा

र्थान्तरमिति। सत्त्वात् समवायस्य सत्त्वात् तथा च समवायस्यैवाधाराधेयभावत्वेऽपि समवायः स्वरूपघटत्वाधारतासत्त्वेन तत्त्वापि

घटत्वविशिष्टपुष्पावृत्तेः समवायातिरिक्तेऽप्याधारतास्वीकारेऽपि तथा च किं समवायेनेति भावः। ननु पटे घटत्वसमवा

याभावादेव न तत्र प्रतीत्यापत्तिरित्यत आह एवं तत्रेति। तस्मिन्नेवेति। तथा च समवेतत्वमिति प्रतीते स्वरूपसंबंधेनोप एम ३७

पादयितुं न शक्यत्वात् समवायस्वीकार इति भावः। यत्तु ननु स्वं घट इत्यादिप्रतीतीनामनेन स्वरूपसंबंधविषयकत्वे

गौरवात्तत्स्वरूपेनातिरिक्तसमवायविषयकत्वमिति ध्येयं। समवायप्रमाणमुक्त्वाभावेन दृढयति। नचेति। अस्तित्विति। स्वत्वा

धिकरणकत्वमित्यर्थः। तस्मिन्निति। अभावविरहात्मत्वे च। ननु नवपदार्थाभावो नास्तीति भ्रमः किंतु तस्याधिकरणस्वरूपत्वेनैवोपपत्तेरिति

रिक्तत्वे मानाभावादिति प्राभाकरमतमाह दीधितौ। अत्र प्राभाकरा इति। अतिरिक्त इति। अधिकरणादतिरिक्तः। ननु तथाप्य

भावग्रहाय प्रत्यक्षमानातिरिक्तत्वात् विशेषणतानामकप्रत्यासत्तेरावश्यकत्वेनेत्यर्थः। पदार्थविशेषणताग्रहार्थमेवपूर्वं तत्प्रत्यासत्तेरंगी

कारः। तथा चाभावग्राहकत्वेन तत्प्रत्यासत्तिकल्पने पदार्थान्तरत्वे लाघवमिति भावः। इदं अभावप्रतीतिविषयीभू

तो। तेषां प्रत्यक्षः। अभावस्वरूपत्वापत्तिः। तथा च तत्राधिकरणाभाववत्त्वं न स्विप्रमेयत्वं इति भावः। अभावा इति। अभावाधि

करणत्वमित्यर्थः। एककालावच्छेदेन घटाभावाधिकरणतानां भूतलत्वेनैवोपपत्तेः तत्स्वरूपत्वसंगतिः किं पदत्वमिति भावः।

नचाभेदइति। अभेदे। अभावाधिकरणयोरभेदे। तथा भावः। आधाराधेयभावः। अनवस्थापत्तेरिति। घटाभावे

तिरिक्ताभावे तद्घटाभाववत्ताभावेऽपि तिरिक्तः कल्पनीयः तथा चानवस्थेत्यर्थः॥ ननु घटत्वधर्मविशिष्टे घटत्वधर्मावच्छिन्न

वत्तानप्रतीयते तत्धर्मावच्छिन्नेन धर्मावच्छिन्नानिरूपिताधिकरणतानां तेषां संबंधभूतले भूतलत्वावच्छिन्नानि

रूपिताधिकरणताभावान्न भूतले भूतलत्वमिति प्रतीत्यापत्तिः। भूतले घटाभाववत्तावच्छिन्नानिरूपिताधिकरणतायाः

न.प्र.
३८

त्वाकालावच्छिन्नत्वे घटाभाववति प्रतीतिरुपपत्तेर्वैसत्त्वासाहाहा। किं चेति। आद्ये तदधिकरणस्य घटाभाववत्त्वरूपत्वे
इदानीमिव तत्रापि हेतिशेषः। अत्र तु नहदधिकरणस्य घटाभावास्त्वरूपत्वे। अन्यदावाति। द्वितीये तेषामर्थः। नन्वतिरि
क्ताभाववादिमते घटेऽस्त्रानीते घटाभावो न तनेस्यति न वा गच्छति तस्यातिसत्त्वाद्भावत्वाच्चेति कुतो न घटाभाववत्ताबुद्धि
ः कथं वा भावाभावयोरेकाधिकरणत्वानित्वरूपविरोधः। तयोर्भावयोः सत्त्वात्। अथ घटानधिकरणकालावच्छि
न्नत्वरूपत्वादिकमेव घटाभावस्य संबंधः। तथा च घटध्वंसभूतले अनेन संबंधेन घटाभावस्याविद्यमानत्वान्न घटाभावव
त्ताबुद्धिः। घटाभावस्य तेन संबंधेनाविद्यमानत्वाच्च न विरोधः इति घटकसंबंधेन तदधिकरणत्वानित्वरूपविरोधध्वा
कालोपाधितिचेन्न। तर्हि विशिष्टसत्ताया अनतिरेकेपि यथा विशिष्टनिरूपिताधिकरणताया गुणेऽसत्त्वेन गुणो गुणा
कर्मान्यत्वविशिष्टसत्तावानिति न प्रत्ययः। तथा च घटध्वंसभूतलेपि तत्कालावच्छेदेन घटाभावाधिकरणताया अनंगीकारेण अ राम
घटाभाववत्ताबुद्धिप्रसंगाद्यसत्त्वासाहाहा। किं च कपाले इति। केचित्तु ननूत्पादविनाशशालिनीयस्य कालादि काधिकरण ३८
तोपेयते तस्याच्च घटेऽध्यानीते नाशोपगमेन न तद्वत्ताबुद्धिप्रसंगः स्यात्सत्त्वासमाहुः। न इत्यतः प्रतिशरणं अप्रामाणिका

यं। तन्मते घटाभावाधिकरणतायां घटाधिकरणकालस्यावच्छेदकत्वानुपगमेनानुपपन्नाभावात्। अस्य इति। घटप्रागभावो
घटध्वंसश्चेत्यर्थः। सर्वदेति। प्रागभावनाशकाले ध्वंसानुत्पत्तेस्तत्तोवेत्यर्थः। कपालमात्र इत्यर्थ इति केचित्। अन्यथा
प्रागभावकाले सत्यपि प्रतीतौ सत्त्वाभ्यां कपालप्रतीतिरयोग्येति। कपालत्वरूपप्रागभावध्वंसयोः प्रतीतौ कपालमपि
कथं प्रतीयेत। अत्र पारणामैकत्वेनाप्येकस्याप्रतीतौ न कस्यापि प्रतीतिः स्यात्। कस्यचित्प्रतीतौ सर्वस्यैव प्रतीयेतेति भा
वः। अन्यथा कपालसत्त्वे इत्यर्थः इति केचित्। नन्वत्रापि घटकालावच्छेदेन घटप्रागभावध्वंसाधिकरणतायाम
नभ्युपगमात्तत्काले तद्वत्ताबुद्धिः स्यात्सत्त्वासाहाहा। किं च मोक्ष इति। उत्पादविनाशशालिनामधिकरणत्वमंगीकृत्य
घटकाले घटप्रागभावाधिकरणताया नाशात् ध्वंसाधिकरणताया अनुत्पत्तेश्च न तद्वत्ताबुद्धिः स्यात्सत्त्वासालिंचेत्यादि इति क
श्चित्। तन्न। पूर्वमेव दूषितत्वात्। इन्नादेयं। अस्य साध्यत्वेति। दुःखोत्पत्तौ च ध्रुवसमानकालीनातिरिक्तध्वंसनधारणासमानाधिकरणत्वमनेक
विधं दुःखं केपि नानुभूयताहेति वोध्यं। ननु नित्यसुखाभिव्यक्तेरेव मुक्तित्वेन नासाध्यतापत्तिरत आह संसेव्य इति। तैरि
ष्यमाणेनाकारान्तरेण यानि नित्यसुखसम्प्राप्तिर्वेदान्तिनस्तु नित्यसुखे प्रमाणाभावेन नित्यसुखाभिव्यक्तेर्न मुक्तित्व

णामवत्त्वं भवति तस्मात् दुःखध्वंसरूपमुक्तेः साध्यत्वोपपत्तिः स्यादेवेति भावः । इदं तु चिंत्यं । तन्मते दुःखध्वंसनिरूपिताधिकरण
तायाः साध्यत्वसंभवेऽप्येवमोक्षाधिकरणतायाः साध्यत्वोपपादनमिति प्राभाकरमतेन कश्चिद्दोषः । वस्तुतस्तु भूतले घटो नास्ति
घटवति घटो नास्तीत्यादिप्रतीतीनां प्रमात्वं नाधिकरणभेदेन तत्तदधिकरणस्वरूपाभावविषयकत्वकल्पने गौरवात् एकातिरि
रिक्तघटत्वावच्छिन्नप्रतियोगिताकाभावविषयकत्वमेव समुचितं । एवं घटवत्तानुमितिं प्रति घटाभाववत्ताज्ञानत्वेन प्रति
बंधकतायां सघटभूतलेऽपि यत्किंचिद्घटाभावसत्त्वात् घटाभाववत्ताज्ञानत्वेनैव प्रतिबंधकत्वं वाच्यं तदपेक्षया घ
टत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेन प्रतिबंधकत्वस्यैवोचितत्वमित्यादिरीत्यातिरिक्ताभावसिद्धिरिति निपुणतरमू
हनीयं । तदभावः इति । घटाभावाभावस्याप्यभावः इत्यर्थः । केवलाधिकरणमित्यादि । किं केवलाधिकरणं घटाभावानधिकरणं भूतलं
तदभावः । घटाभावाभावः सर्वत्र घटाभावस्थलेऽपि सत्त्वात् अधिकरणस्वरूपस्य तत्तत्सर्वत्राधिकरणस्वरूपत्वेऽपूर्वं दूषणं
दत्तमेवेत्यत आह भवदुक्तेति । एवं घटाभावाभावस्याधिकरणस्वरूपत्वे तथा व्यवहारविषयाणि अधिकरणस्वरूपत्वे त्वयोक्ता
नितानि तत्र तेऽव्यवहितानीति भावः । तत्सत्त्वे घटसत्त्वेऽनुक्तप्रयुक्तेति आधाराधेयभावानुपपत्तिरूपदूषणानामापत्तेरादि

त्यर्थः । अप्रामाणिकत्वादिति । बीजांकुरानवच्छेद्यपि प्रामाणिकत्वे + संप्रदायमते तु स्वोत्पत्त्यवच्छेदेनेत्यप्रामाणिकत्वमिति । अ
[illegible] वेऽन्याभावत्वेन प्रतिबंधकताभावात् प्रमात्वे बाधकाभावात् । अन्योन्याभावस्थले शंकते न स्यादेतदिति । अस्ति भूतले
घटभेद इति प्रतीतावभावीयाधेयता घटभेद इति प्रतीतेर्न स्यादिति । घटभेदभेदस्य भेदत्वापात इत्यर्थः । भवदुक्तेति । आधाराधेयभावानुपप
त्तिरूपदूषणानामापत्तेरादिरित्यर्थः । + ध्वस्तत्वादिति इत्यर्थः । संक्षेपयति । घटभेदाभावो घटत्वस्वरूप एवान्यथा द्वितीयाभावादिति ।
प्रागुक्तयुक्त्यातिरिक्तत्वेनैतद्भावो भावश्चेत्यर्थः । तत्र प्रथमोद्दिष्टमन्योन्याभावं लक्षयति । तादात्म्येति प्रतीतिसाक्षिक
इति । इदं घटःप्रतीतिसिद्धसंबंधो यो विरूपान्योन्याभावलक्षणमन्योन्याभावलक्षणमित्यर्थः । प्राचीनोक्तमन्योन्याभावलक्ष
णं दर्शयति । यद्वेति । तादात्म्येति । घटतादात्म्यं हि घटत्वं तथा च घटान्योन्याभावबोधे घटत्वसंबंधावच्छिन्नप्रतियोगिता
काभावप्रतियोगिताविशेषकमिति द्विविधतया घटत्वस्य भानेन तदवच्छिन्नप्रतियोगिताकस्यान्योन्याभावत्वमिति लक्षणसमा
गमनयः । न च संयोगिता तादात्म्यसंयोगावेति संयोगावच्छिन्नप्रतियोगिताकसंयोगसंबंधाभावेऽतिव्याप्तिरिति वाच्यं तादा
त्म्यसामान्यसंबंधावच्छिन्नेति तदर्थात् । तादात्म्यत्वविशिष्टत्वमेव हि तादात्म्यसामान्यत्वं । तादात्म्यत्वं संबंधताविशेषः प्रतीतिसा

न॰प्र॰ ५० ष्टिकः। घटत्वादिरूपतादात्म्यसंसर्गतादात्म्यत्वेनैव घटान्योन्याभावप्रतियोगितावच्छेदकमिति लक्षणसमन्वयः। संयोगसंबन्धा
भावे च संयोगत्वेनैव संबंधत्वं न तु तादात्म्यत्वेनेति नानुपपत्तिः। अत्र ध्वंसप्रागभावयोरन्योन्याभावस्य प्रतियोगितावच्छेद
कसंबंधे मानाभावः। न चात्यन्ताभावस्याप्यतिव्याप्तिरिति वाच्यं। संयोगसंबंधावच्छिन्नघटात्यन्ताभाववन्नाशानेनैव लक्षणविशिष्टघटा
यादिसंबंधेन घटवन्नाशानोद्दयात्संयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावप्रकारकज्ञानत्वेन प्रतिबंधकत्वात्। अ
त्यन्ताभावस्य प्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वात्। अन्योन्याभावस्य च नानासंबंधावच्छिन्नप्रतियोगिताकत्वाभावे न
समवायेन घटत्ववन्नाशाने प्रति घटान्योन्याभाववन्नाशानत्वेनैव प्रतिबंधकतयान्योन्याभावस्य तथात्वव्यापकत्वादिति
रवेद्रोपाधिरूपत्वमेव समवायितासंबंधस्य आहुरित्यनेन सूचितम्। तदुक्तं इति। अन्योन्याभावानामर्थः। तथा चान्योन्याभावभिन्ना
भावत्वं संसर्गाभावत्वमिति तन्त्रसूत्रगत्रमिति भावः। अत्र च यदि नास्तीति प्रतीतिसिद्ध [illegible] ष्टिकः अभावः संसर्गाभावः। न
ह्यन्योन्याभावः। अन्योन्याभावस्य यदि च तु तद्विलक्षणत्वेनैव यदि नास्तीति प्रतीतेरत्यन्ताभावत्वविषयकत्वेनैवोपपत्तेरिति कसंसर्गा राम
भावत्वेमानाभावात्तत्वयोक्तं सोऽपि संसर्गाभावो वि। अत्र नात्मानमनुभवेमादि अत्रेवमिन्नप्रदत्वादिप्रतीतिप्रदर्शनेन अ ५०

त्यन्ताभावध्वंसयोः प्रमाणप्रदर्शनाय नतु लक्षणोपिततन्त्रिवेशकृतितो ध्वंसादिनित्यत्वमात्योऽक्तौ गगनादौ संसर्गाभावत्वे
मात्योऽक्तौ च ध्वंसप्रागभावयोरतिव्याप्तिरितुभयोपादानं। तेनित्यत्वं चात्र प्रागभावप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं।
ध्वंसस्य प्रागभावप्रतियोगित्वात् प्रागभावस्य च ध्वंसप्रतियोगित्वात्तत्राति प्रसंगः। एतकत्वमात्योक्तौ चात्यन्ताभावतिव्याप्
रिति ध्येयं। उत्पत्तिमत्वेनित्युत्पत्तिमत्वमात्योऽक्तौ घटादौ अभावत्वमात्योक्तौ चात्यन्ताभावादावतिव्याप्तेर्वारणायोभयोपाद
नो। अत्र प्रकृतसंबंधत्वत्ति। स्वाधिकरणक्षणवृत्ति प्रागभावप्रतियोगिक्षणसंबंधत्वत्ति इति यावत्। अत्र ध्वंसलक्षणयोग
क्षणयोगत्वनिर्मिते निवा। तदर्थः। स्वाधिकरणक्षणध्वंसानधिकरणसंबंधत्वमिति। स्वल्पलयाशीकर्तृमते तु कचि
दपि यदैव समयसंबंधोपसमय वृत्ति ध्वंसप्रतियोगित्वं नास्ति तस्य तेन समयसंबंधत्वमिति तदर्थः। स्वर्वृत्तिपदार्थप्रागभा
वानधिकरणत्वे स्ववृत्ति ध्वंसप्रतियोग्यनधिकरणत्वं वा क्षणत्वमिति वा बोध्यं सर्वध्वंसश्च। ननु प्रतीतिरेव मानमत्र चा
दान हाति। ध्वंसस्य ध्वंसाप्रतियोगित्वं प्रागभावाप्रतियोगित्वमपि स्यादिति भ्रमनिराकर्तुमाह तत्प्रागभावश्चेति ध्वंस
प्रागभावश्चेत्यर्थः। अत्र च प्रतियोगिप्रागभावस्य तत्प्रागभावध्वंसत्वात्। अत्र प्रतीतिप्रमाणमापततिमुभयपदेनेति प्रतियोगि

त.प्र.
४१

इत्यादौ प्रतियोगिप्रागभावइत्यादौ चेत्यर्थः। इदमुपलक्षणं। ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्व
नियमेन ध्वंसस्य ध्वंसस्वीकारे घटोन्मज्जनप्रसंगात् न ध्वंसस्य ध्वंसः। एवं घटप्रागभावकाले ध्वंसोन्मज्जनप्रसंगात् न घ
टप्रागभावस्य घटध्वंसप्रागभावरूपत्वेनापि दृष्टं यो प्रागभावत्वलक्षणमिति। विनाशीति। घटादौ अत्यंताभावादौ चातिव्याप्ति
वारणाय यथाक्रमं विशेषणद्वयोपादानं। ननु प्रागभावांगीकारे मानाभाव इत्यत आह स्वेति। तथा च भविष्यतीति प्र
तीतिविषयतया प्रागभावोऽवश्यक इति भावः। ननु भविष्यत्त्वस्य वर्त्तमानप्रागभावप्रतियोगित्वरूपत्वे प्रागभावसि
द्धिः। न ह्येवं किं तु वर्त्तमानकालोत्तरकालोत्पत्तिकत्वमेव तत्त्वं। न च परत्वमप्यवबाहितोत्तरोत्पत्तेः क्षणात् सतद्वति त्त
मानिति सामग्री व्याप्ते घटादिहेतुतावच्छेदको घटादेरुत्पत्तिकारणप्रागभावहेतुत्वमावश्यकमिति वाच्यं। उत्पन्नत्वं भा
वेन सामग्रीकाले नैरन्तुप्यमानता। अपि तु नेदमधिकरणत्वं तदभावेनैव। अन्यथा तथा। तथापि जन्यद्रव्यत्वावच्छिन्नं प्रति
समवायेन द्रव्यत्वेन प्रतिबंधकत्वोपगमेनानुपपत्तेरभावात्। अनेन प्रागभावकत्वं नामपेक्ष्यैकप्रतिबंधप्रतिबंध
कभावकल्पनायाः एवमाप्युत्पत्तिरिति चेत् अत्राहुः। सहस्रतन्तुकपटस्य तुल्येऽस्यानधिकरणत्वेनादौ पटोत्पत्तिवारणा

राम
४१

यत्तावत्संयोगानां तन्तुत्वेन तन्तूनां वा तज्जनकशक्तिमत्त्वेन कारणत्वमपेक्ष्य एकप्रागभावकारणत्वमेव समुचितं। प्रागभावस्य च प्रतियो
गितया न्देशत्वनियमेन पटादीनां देशनियमोपपत्तेः। न च त्रिचतुरेषु तन्तुषु संयुक्तेषु वर्त्तमानेषु तन्तुषु तत्पटोत्पत्तिवारणाय तन्तु
तन्तुसंयोगानां हेतुत्वमावश्यकमिति वाच्यं। चरमतन्तुसंयोगध्वंसक्षणे तच्छक्तित्वेन हेतुत्वोपगमात्। चरमसं
योगानधिकरणतन्तावपि तत्पटोत्पत्त्यापत्तिवारणाय हेतुत्वे तत्पटादृष्टकारणत्वेनाप्यागमाभावस्यैवावश्यकत्वात्। च
रमसंयोगस्य तेनैव पटं प्रति समवायेन हेतुता चरमसंयोगानधिकरणतन्तावपि तत्पटोत्पत्तेः। किं तु समवायसंबंधेन पटं प्रति
कालिकसंबंधेन चरमसंयोगो हि तु यत्वमप्रकृतविचारेण। तस्य चेति। प्रागभावस्य चेत्यर्थः। तत्र ध्वंसस्य प्रतियोगिध्वं
संस्वप्रतीतीति प्रमाणापत्तिरुभयत्रेति प्रतियोगि इत्यादौ प्रतियोगिध्वंसः इत्यादौ चेत्यर्थः। इदमुपलक्षणं। प्रागभावोन्म
ज्जनप्रसंगोऽपि दूषणमित्यपि विनिःसाविति। नित्यत्वे चान्यप्रागभावप्रतियोगित्वे स्यात् ध्वंसप्रतियोगित्वं स्यात्। अत एव न ध्वंसप्रा
गभावयोर्भाग इति भावः। प्रसंगात् प्रागसत्त्वकृतिधर्मावच्छिन्नप्रतियोगिताकाभावमनिरुक्तं साधयितुं प्रणालीमारभते
नित्यत्वेत्यादिना। एकमात्रेति। एकमात्रवृत्तिधर्मवृत्तिकेत्यर्थः। अनुमतेति। एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगि

ताकत्वेत्यर्थः। न चांशे एकमात्रावगाह्यप्रमात्विकधर्मावच्छिन्नप्रतियोगिताकोऽभावो घटवतीत्यादिप्रतीतिद्वयप्रदर्शनम
स्वेताभावस्यैकास्याभावत्वेनाघटवतीति। व्याप्तज्यह्नि धर्मावच्छिन्नाभावानभ्युपगमेनातादृशप्रतीत्यनुपपत्तिरिति भावः। न
चेतादृशप्रतीतेः घटाभावविषयकत्वेनैवोपपत्तेर्नातिरिक्ताभावसाधकत्वमिति वाच्यं। तथा सति कश्चिद्घटाभावः कचिद्
घटाभावोऽपि विषय इति तादृशानुगतप्रतीत्यनुपपत्तेः। अनुगतधर्मं विनानुगतप्रत्ययाभावात्। नन्वायातु द्वित्वावच्छिन्नप्रति
योगिताकाभावः तथापि कुत्रानामेव द्वित्वसमानाधिकरणघटत्वपटत्वावच्छिन्नप्रतियोगिताकाभावानां प्रतियोगिता
[redacted] वच्छेदकं न दृश्येत। तथा च तस्यातिरिक्तत्वे मानाभाव एवेत्यत आह। एकघटवतीति। घटौ न स्त इति प्रती
तेर्यदि घटप्रतियोगिकाभावो विषयस्तर्हि घटद्वयवत्यपि स्यात् किंचिद्घटप्रतियोगिकाभावसत्त्वात्तादृशप्रतीत्यापत्तेः। यदि
च घटत्वावच्छिन्नाभावो विषयस्तदा एकघटवत्यपि घटौ न स्त इति प्रतीत्यनुपपत्तिरित्यनायत्यातिरिक्तोऽभावोऽभ्युपेयते राम
इति भावः। ननु न द्वित्वमिति न द्वित्वाभावघटत्वावच्छिन्नाभावः। घटौ न स्त इति तस्यैव घटत्वावच्छिन्नाभावो विषयो वक्तुं शक्यत एवेति ४२
चेत्तथा अनुगतधर्मं विनानुगतप्रतीतेरुपपादयितुमशक्यत्वादतिरिक्तः प्रागेव निवेदितत्वात्। नानुपलब्धिं विद्वद्वति

घटपटौ न स्त इति प्रतीतेर्द्वित्वसामान्येन प्रतियोगितावच्छेदकं न तथा विषयतां किंचिद्द्वयसत्त्वेन तद्वच्छिन्नाभावासंभवात् नापि
द्वित्वविशेषावच्छिन्नद्वित्वत्वेनानुपस्थितेः। केवलघटादिमन्यपि तथाप्रत्ययेन प्रत्येकं घटत्वपटत्वादिकमपि न तथेति त्वन्मते
ऽननुगतप्रत्ययोऽनुपपन्न एवेति चेन्न। द्वित्वे द्वित्वधर्मितावच्छेदकीभूतं घटत्वं पटत्वं च तथा प्रतियोगितावच्छेदकतावत्त्वा
सम्बन्धित्वयोः प्रतियोगितावच्छेदकावच्छिन्ने च घटपटोभयाभिन्नित्वेनानुपपत्तिलेशोऽपीति ध्येयं। न योगिति। प्रतियोग्यभावयो
रैकाधिकरणाहेत्यत्वरूपविरोधादित्यर्थः। नन्वेकस्मिन्नपि समवायेन द्वित्वमस्त्येव न त्वत आह। एकोऽपीति। एकस्मिन्न समवाये
न द्वित्वस्य सत्त्वेन एकोऽनास्तीति प्रतीत्यापत्तिः। तत्समवायेन तत्सत्त्वेऽपि पर्याप्तिसंबंधेन तदत्त्वाभावात् तथाप्रतीतिरित्युपेयं। एवं च प्र
तियोगितावच्छेदकपर्याप्त्यधिकरणेनैवाभावस्य विरोधात्तत्र द्वित्वानुपपत्तिरिति भावः। प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य
विरोधात्प्रतियोगिमत्यपि नातिरिक्ताविशिष्टाभावोऽविरुद्धः इत्याह स्वतन्त्र एवेति। प्रतियोगितावच्छेदकावच्छिन्नेनैवाभा
वस्य विरोधादित्येवमर्थः। स्वयं द्रव्यगुणत्वेनान्यतीतिनिषेधात् तस्य गुणत्वस्य। न च कश्चिद्घटाभावः कश्चिद्धटपटाभावोऽपि विषय इति वाच्यं। वि
षयानुगमं विनानुगतप्रतीत्यनुपपत्तिरित्यस्यासकृदावेदितत्वात्। नन्वायातु प्रदर्शितरीत्यातिरिक्तोऽभावस्तथापि न द्वा हि

कानविशेषणताप्रत्यासत्तिः। किं तु वस्तुगत्या हि ज्ञानासंभवाद्यथाऽनुमानादेः प्रमाणान्तरत्वं तथाऽभावग्रहे क्लृप्तानां
संयोगादिसन्निकर्षाणामभावेनेन्द्रियकार्येण ग्राहकत्वासंभवात् प्राप्तस्यैवेन्द्रियस्य ग्राहकत्वात्। अथ निमीलितनयनस्यापि घटा
दिग्रहापत्तेरित्यनुपलब्ध्यादिप्रमाणान्तरमभावग्राहकत्वेनाक्लृप्तमिति चेन्न तथा च घटाभावस्यानुपलब्धिरूपप्रमाणजन्यमा
नुपलब्धमेव ज्ञानेन तु साक्षात्कारः। साक्षात्कारत्वस्येन्द्रियजन्यत्वव्याप्यत्वात्। न चैवं निमीलितनयनस्यापि घटाभावग्रहाप
त्तिः। सहकार्यभावे न तदुत्पत्तिरिति नियमात् अभावग्रहे अधिकरणप्रत्यक्षस्य जनकतया तज्ज्ञानार्थमिन्द्रियापेक्षणाद
त एव तज्जनकतयाऽन्यथासिद्धमिन्द्रियं नाभावग्रहे हेतुः॥ न चाधिकरणप्रत्यक्षस्य व्यापारतया तेनैवान्यथासिद्धिः व्या
पारेण व्यापारिणोऽन्यथासिद्ध्यसंभवात् अन्यथा चक्षुःसन्निकर्षेण चक्षुषोऽप्यन्यथासिद्धिः प्रसज्येतेति वाच्यं। इन्द्रियस्य ज
नकत्वसंभवेऽधिकरणप्रत्यक्षस्य व्यापारत्वं न तदेव नाक्लृप्तसन्निकर्षाभावात्। एवमनुपलब्धिरूपप्रमाणस्यापि विफल
त्वात्यैव प्रमाणान्तरत्वं गतमिति निष्कृष्टं भट्टमतं दूषयित्वा तु तन्मतमुपन्यस्यति। अदृष्टत्वस्याहीना॥ नेन्द्रियग्राह्यः नेन्द्रि
यजन्यलौकिकसाक्षात्कारविषयः॥ क्लृप्तसन्निकर्षाणां संयोगादीनां सन्निकर्षाणाम्॥ अभावात् अभावेऽसंभवात्।

ननु तर्हि अभावग्रहानुपपत्तिरित्यत आह किंचेति। ईदृशप्रमाणान्तरजन्यज्ञाने च न सन्निकर्षापेक्षेति नेन्द्रियजन्यतेति भा
वः। प्रमाणान्तरेति। धर्मिकल्पनातो धर्मकल्पनायाः लघीयस्त्वमिति न्यायादनुपलब्धेः अक्लृप्तविजातीयप्रमांप्रति करणत्व
कल्पनमपेक्ष्य क्लृप्तप्रत्यक्षप्रमाहेतुतया विशेषणतारूपसन्निकर्षकल्पनमेव लघीय इत्यर्थः। तथा चेन्द्रियेणैव तदुहरति
भावः। अन्यथेति सन्निकर्षकल्पनयोपपत्तावपि प्रमाणान्तरकल्पने इत्यर्थः॥ अन्यथा सन्निकर्षतया कल्पने इत्यर्थः इत्यपि
काश्चित्। क्लृप्तानां संयोगादित्रयाणां सन्निकर्षाणां शंकते। तत्रेति प्रत्यक्षस्य एव प्रत्यक्षविषयत्वं वा अवशेषः। तथा च ज
न्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतुतया शब्देऽपि सन्निकर्षकल्पनमावश्यकं। सन्निकर्षत्वं च संयोगाद्यन्यतम
त्वमिति भावः। अधिकस्य एवेत्यनेनातमभावः इति शेषः। तथा चात्राप्यभावग्रहार्थं सन्निकर्षापेक्षणमावश्यकमिति भावः। ननु
शाब्देऽपि प्रमाणान्तरत्वेऽन्तरीक्षसंयुक्ते प्रतिबन्धे तु नालादिसमवायाग्रह इत्याह किं चेति। न तु व्यापाराभावे विफलतायोगाद्यवच्छिन्ने
करणत्वरूपकरणत्वमुपपद्यत एव अत एव साधकतमं करणमिति निरस्तमपास्यत इत्याह व्यापारवदिति। निमीलनेन्द्रि
याणामसंधकत्वेऽपि चक्षुषो विफलत्वायोगात् इतरथा करणतामात्रव्यवधाने पर्यवहितेऽतिरक्षणोत्पादनेपि फलायो

गत्ववच्छिन्नत्वं वा चोपनतस्य यावत्कारणघटितत्वपारूढेन यावत्कारणत्वस्यैव कारणत्वरूपत्वेऽपि तेनानुपलब्धेः
प्रमाकरणत्वव्याघातदिति भावः। उक्तमिति उक्तप्रायमित्यर्थः। वस्तुतस्तु धर्मिकल्पनाभावेनैव सन्निकर्षकल्पनेन तु
प्रमाणान्तरकल्पनमिति पूर्वोक्तयुक्तिरिति मणौ य इति दूषयति अनुपलब्ध्या व्यप्रमाणान्तरतां कारे घटाभाववति घटस्मर
णायां घटाभावस्य तदिन्द्रियसंबन्धविशेषणतया घटाभावप्रत्यक्षापत्तिः। तस्मात्तेन घटोपलम्भसत्त्वेनानुपलब्धेर
भावात्तेन तन्मयापत्तिरित्यनायत्या प्रमाणान्तरकल्पनमावश्यकमित्याशयेन मीमांसकः शंकते नन्वेवमपि तदव
नुपलब्ध्या व्यप्रमाणमनेनाकृतमिन्द्रियसंबन्धविशेषणतयापत्तिनिरासाय प्रमासत्त्वित्ति योग्यानुपलब्धेरपाता। च
क्षुषा घटाभावप्रत्यक्षजननीयमवश्यमस्तीति। तु प्रमाणत्वेनाप्युपगतायाः योग्यानुपलब्धेः सहकारित्वं कल्प्यते। घटाभा
ववति च घटोपालंभे न योग्यानुपलब्ध्यभावादेवेन घटाभावप्रत्यक्षापत्तिरिति भावः। नन्वेवं किमविशिष्टमनुपलब्धेः
प्रमाणत्वेन प्रत्युतेन्द्रियस्य कारणत्वे विशेषणताहृत्यप्रत्यासत्तिकल्पनमधिकमिति चेन्नाविजातीयप्रमाकल्पनापे राम
क्षया प्रत्यासत्तिकल्पनाया मापलात्त्वा पारवश्याभावेन प्रमाणत्वासंभवस्य पूर्वमेव दर्शितत्वाच्चेति। अभावग्रहे अ ४४

भावलौकिकप्रत्यक्षोऽसाधकेयमिति। इयं अभावग्रहहेतुः। योग्यस्यानुपलब्धिरिति वा योग्योऽनुपलब्धिरिति वा योग्या
नुपलब्धिरिति शार्थ इत्यर्थः। तत्र घटाशंकते योग्यत्वेति। जलपरमाणौ कितिः महत्त्वाभावप्रत्यक्षानुरोधेनाविजातीय
वस्तुः संयुक्तविशेषणतया अवश्यं ग्राह्यमिति कार्यं तथा पृथिवीत्वाभावस्यापि ग्रहापत्तिरिति भावः। दूषणं तन्महत्त्वे पे
इति। द्वितीयमाशंक्य निरावष्टे। अथ योग्ये इति। स्वैकदेशमतं दूषयितुं तन्मतमनुपन्यस्यति। यात्विति। वा वा विति। वा
योग्यत्वमिति भावः। परमाणौ महत्त्वग्रहेणापत्तेः तथापि दूषयति। अनुभवेति। वायुर्नरूपवान्। परमाणुर्न महानि
त्यादिप्रत्यक्षप्रतीतीनां विलोपप्रसंग इति भावः। योग्या या सा वेनुपलब्धिश्चेति कर्मधारयमभिप्रेत्याह अन्त्ये अ
नैरिति। योग्येत्यस्य विवरणं सहकारीति। तथा चाभावप्रत्यक्षसामग्रीविशिष्टेत्यर्थः प्रतियोग्यनुपलब्धिरेव योग्यानुप
लब्धिरित्यर्थः। अत एव सहकारीत्येवं च तत्त्वरूपयोग्यत्वाविशेषणे हेत्वाकाङ्क्षेति। योग्यसन्निकर्षस्यैवाभावप्रत्यक्ष
सामग्रीघटकत्वेन परमाणौ न पृथिवीत्वाभावग्रह इति भावः। ननु महत्त्वे भूतरूपवदुद्भूतविशेषणतानाः पृथिवीत्वा
भावग्राहकत्वेऽपि नीरूपत्वे तद्रूपाभावग्राहकत्वे उद्भूतरूपाभावातिशयान्तस्या असंभवादिति तत्रैन्द्रियसंबन्धविशेषणता

नापाद्ययोग्यसन्निकर्षत्वमुपेयं। एवं च मनस्यप्युद्भूतरूपाभावप्रत्यक्षापत्तिरत आह उद्भूतरूपाभावेत्विति। उद्भूत
रूपाभावग्रहे त्वित्यर्थः। तथा च प्रकृते रूपमनिवेश्य महत्त्वं निवेशनीयमिति भावः। अतः महत्त्वविशेषणतामात्रे न तु रूपं तु उद्भूतरू
पाभावग्रहः। वायावित्यत्र न तु रूपं हि मनु विद्यते। न तु महत्त्वाभावग्रहे कः कः सन्निकर्षः इत्यत आह पृथिवीत्वाभावप्रत्यक्षेऽनु
पपत्तिः तत्रेन्द्रियसन्निकृष्टमहत्त्वादिमद्विशेषणतानादिरहात्। एवमन्योन्याभावग्रहे कः योग्यः सन्निकर्षः कुत्र ते आह एवमन्य
त्रापीति। महत्त्वाभावग्रहवदित्यर्थः। महत्त्वाभावे इन्द्रियसन्निकृष्टोद्भूतरूपवद्विशेषणतायोग्यः सन्निकर्षः। गुणत्वादौ पृथिवीत्वा
भावग्रहे त्विन्द्रियसन्निकृष्टविशेषणतैव योग्यः सन्निकर्षः। अन्योन्याभावे तु पृथिवीभेदादौ इन्द्रियसन्निकृष्टमहत्त्वादिमद्विशे
षणतायोग्यः सन्निकर्ष इत्यर्थः। ननु कुत्रचिदिन्द्रियसन्निकृष्टमहत्त्वादिमद्विशेषणता कुत्रचिदिन्द्रियसन्निकृष्टविशे
षणतायोग्यः सन्निकर्ष इत्यत्र किं नियामकमत आह कार्यवशादिति। तत्तत्तज्ज्ञप्रतियोगिकाभावग्रहानुरोधादित्यर्थः। ननु विशेषणता वे राम ४५
त्वेताभावग्रहे तावता विशेषणस्यापत्तिरलं च योग्यसन्निकर्षसत्त्वेन कोऽप्यनुपलब्धिसत्त्वादित्यत आह विशेषणतायां त्वेताभावाहत्वि
ति। अयोग्यत्वादिति। एवमग्रे विषयस्याह तु अयमाभावप्रत्यक्षे योग्याभावत्वेनेहतुल्यो इ गमादिति॥ का पुनरत्वं च अयोग्यं

प्रतियोगिकस्यापि त्वन्मते विशेषणतयेदस्य प्रत्यक्षो स्यात्, अत्यन्ताभावस्यैवेति। का पुनरत्यन्ताभावे योग्यतेति। नु न
रमपि तत्रैव बोध्यं। योग्यमात्रेति। विशेषणस्य योग्यत्वेन योग्यप्रतियोगिकत्वाभावादेव न तदभावप्रत्यक्षमि
ति भावः। घटविशेषणतावत्तदभावताया मात्रेति। अतीन्द्रियाप्रतियोगिताकत्वमिति तदर्थः। ननु वायौ रू
पसामान्याभावप्रत्यक्षानुपपत्तिः तस्यातीन्द्रियरूपाप्रतियोगिकत्वेन योग्यमात्रप्रतियोगिकत्वाभावात्। एवमेतदु
द्भूतत्ववदत्यन्ताभावप्रत्यक्षापत्तिश्चेत्यत आह। योग्यधर्मेति। विशेषणत्वघटविशेषणतासत्त्वाद्दानां योग्यधर्मत्वा
भावेन तेन तेन रूपवच्छिन्नाभावप्रत्यक्षमिति भावः। वस्तुतस्तु योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताक
त्वं विशेषणमिति बोध्यम्। योग्यमात्रप्रतियोगिकेऽभावे योग्यधर्मावच्छिन्नप्रतियोगिताकत्वविशेषणं योग्यते
त्यर्थः॥ योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं योग्यतेति यावत्। तेन तथाभूतत्वेद्रव्यसा
मान्याभावप्रत्यक्षं वारणाय योग्यमात्रप्रतियोगिताकत्वे। एतद्भूतत्ववदत्यन्ताभावं वारणाय योग्यधर्मेति। वायौ उद्भूतसा
मान्याभावप्रत्यक्षं नेष्यत एवेति तदसंग्रहो न दोषाय। एतदूपत्वादुद्भूतत्वान्यतरावच्छिन्नाभाववारणाय च योग्यधर्मेत्यस

त·प्र·
४६

योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थः। इत्थं च ध्येयं न तु पिशाचवदन्योन्याभावोऽप्ययोग्यत्वादेव न गृह्यत इ
ति वाच्यं। तत्रान्योन्याभावे का योग्यता। न तावद्योग्यप्रतियोगिकत्वं तत्त्वे पिशाचभेदग्रहानापत्तेः। पिशाचवद्दृश्य
त्वापत्तेश्च। तत्राह। एवमन्यत्रापीति। अन्योन्याभावेऽपीत्यर्थः। अनुभवानुसारेणेति। तत्तद्धर्मावच्छिन्नप्रतियोगि
ताकत्वमेव तत्तदन्योन्याभावे योग्यत्वमित्यर्थः।। अत एव कथं पुनरत्यंताभावे योग्यतेति सामान्यतः पृष्टात्यंताभावे योग्य
तानिरुक्ता। अन्योन्याभावे तु अननुगतैवेति ध्येयं सर्वैरिति। अत्यंतान्योन्याभावेष्वित्यर्थः। न क्वचिदिति। अत्यंताभावे
योग्यमात्रेत्यादिहि। पादः अन्योन्याभावे तत्तदन्योन्याभावत्वमिति वं हृयानानेव अभावे योग्यतेत्यर्थः। उक्तमितीत्यंगीका
रार्थकमव्ययं। गुणादौ योग्यतावहीति यथाहुः परमाणौ न तादृशेन्द्रिययोग्यत्वं नैकं तथा प्रकृतेऽपीत्यर्थः। केचित्तु विजा
तीयचक्षुःसंयोगाग्रपविशेषरानाद्यास्त्वभावग्रहे कुत्वेन परमाणौ न पृथिवीत्वाभावग्रहः। पिशाचात्यंताभावादेः प्र
त्यक्षवारणाय तु गुरुत्वादिवत्ता दान्ये न तत्तद्भावत्वेन साक्षात्कारं प्रति प्रतिबंधकत्वांगीकारेणेत्याहुः। तदसत्। परमा
णौ महत्त्वाभावात्प्रत्यक्षानुरोधेन विजातीयचक्षुःसंयोगस्यावश्यकतया तेन तत्र पृथिवीत्वाभावप्रत्यक्षवारणात्। अंभ

रम
४६

णतः। पूर्वोक्तं चक्षुर्ग्राहकत्वं समर्थयितुं प्रकृते। अथ किमिदं मिति तैजसमिति। आलोकव्यापारादावतिव्याप्तेर्यथायथमनु
भवोपपादने। चक्षुष्टे तैजसत्वे विवादावतिव्याप्तिरतो रूपग्राहकमिति।। रूपग्राहके महति द्विलस्कासमवाय इति व्याप्तिरतः इंद्रि
यमिति। अत्रैके चित्। चक्षुषः प्राप्यकारित्वे वृद्धसमयोग्रहणानुपपत्तेः शाखाचंद्रमसोस्तुल्यकालग्रहणानुपपत्तेश्च
अप्राप्यकार्येव तद्वाच्यं। एवं चाप्राप्यकारित्वाविशेषाद्बुद्ध्यल्कन्मेव ताइतियार्थिवत्वमेव तत्स्यादित्याहुः।। तदसत्। चक्षुषः
अप्राप्यकारित्वे निमीलितनयनस्यापि चाक्षुषापत्तेः प्राप्यकार्येव तद्वाच्यं चक्षुष्टेजसत्वेनातिशीघ्रगामितया
चंद्रमसा संयोगोत्पत्तौ शाखाचंद्रमसोस्तुल्यकालग्रहणात्वसिद्धेः। मयापुग्यच्छतं शतपत्रपत्राणि छिन्नानीति
वत्। तथाच गोलकस्य घटादिसंयोगाभावेनातिरिक्तं तैजसं चक्षुः स्वीकार्यमिति।। एवमग्रत्रापि बोध्यं वायवीयमिति
। वायवीयत्वमात्रं वा योरिंद्रियत्वमात्रं चक्षुरादावतिव्याप्तमिति निमीलितोपपादने। त्वचो वायवीयत्वे विवादादाह।। स्पर्श
ग्राहकमिति। चक्षुर्मनसोर्न्मनोर्वारणाय यथायथार्थविशेषणमात्रबोध्यादिप्लो।। आप्यमिति। जलत्वव्यवस्थारूपादावतिव्या
प्तिवारणाय विशेषणाद्वयोपादाने।। सत्वस्याप्यत्वे विवादादाह।। रसग्राहकमिति। चक्षुर्मनआत्मनां वारणाय विशेषणम्

त.प्र.
४७

योगादीनां च पार्थिवमिति। व्यावृत्तिः पूर्ववत्। इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयो
गाश्रयत्वं। आत्मन्यतिव्याप्तिवारणाय सत्यंतं निवेशः। शब्देतरपदविशेषगुणास्तत्वाच्छ्रोत्रे ऽव्याप्तेः शब्देतरेति गुणविशेषणं।
चक्षुषि नाद्रागस्पर्शरूपस्य सत्वात्तदुद्भूतेति। उद्भूतत्वं च नीलत्वादिव्याप्यानुद्भूतत्वाभावकूटत्वमेव तस्य च संयोगस्य साधारणत्वाच
क्षुरादावव्याप्तेर्विशेषेति। चक्षुरादेः सत्वात्तद्गुणेति। कालादावतिव्याप्तेर्ज्ञानकारणेति। इन्द्रियावयवसंयोगस्यापि मनस्का
रणतया इन्द्रियावयवे ऽतिव्याप्तिवारणाय मनःसंयोगेति। श्रोत्रं लक्षयति। कर्णेति। यदवच्छिन्नं नभो ऽपि श्रोत्रं तत्वात्तत्कर्ण
शष्कुलीति। नभसः श्रोत्रत्वे विवादाहरणाय शब्दग्राहकमिति। मनो लक्षयति। निःस्पर्शमिति। मनो वेगवत्वादिना मीमां
सकान्मतमाह दर्शयति। स्वतन्त्रमीमांसकाइति।। अणुत्वाभावे ऽपि लोपिनाविभुत्वमिति विरुद्धं चाह। कीदृशत्वेति निःस्पर्शत्वं गुणा
दि व्यभिचारात् तद्द्रव्यत्वादिति द्रव्यत्वे स्पर्शशून्यत्वे व्यभिचारात् निविशिष्टहेतोरिति। आत्मन्यतिव्याप्तिवारणायात्मत्वे सती
ति। संयोगाश्रयत्वे कालादावव्याप्तिर्ज्ञानासमवायिकारणेति। चक्षुर्मनोयोगस्य ज्ञानकारणत्वात्तज्ज्ञानकारणसंयो ५७
गाश्रयत्वं चक्षुरादावतिव्याप्तिमितरत आह स्पर्शसमवायीति। ज्ञानासमवायिकारणं मनःसंयोगाश्रयवेतिनातिव्याप्तिः।

केचित्तु नवीनमते अवच्छेदकविशेषाकृष्टत्वं तु देशिनत्वेन यत्पक्षतावच्छेदकं तस्मिन्नभावात्कथं पक्षतावच्छेदकावच्छेदेनानुमितिः
स्तु दैवि भुत्वस्य बाधेन कथं मनस्त्रविभुत्वानुमितिरित्याह मनस्त्वेनेति। ज्ञानासमवायिकारणेति। पुरुषांतरीयात्मप्रत्यक्षवार
णाय तत्तदात्मसमानसत्वावच्छिन्नप्रतितत्तदात्ममनःसंयोगत्वेन हेतुतायां अनंततद्बुद्धीनां अवच्छेदककोटौ निवेशे गौरवेण
लाघवेनैकमनसः सिद्धिः न चाविजातीयसंयोगत्वेन तस्य हेतुतया तत्र मनसो निवेशः इति वाच्यं।। तथापि समवाये न विजा
तीयसंयोगस्याविजातीयसंयोगसंबंधेन मनसो या हेतुत्वमिति विनिगमनाविरहादिति भावः इत्याह।। विभुत्वे मनसो विभुत्वे
संयोगानुपपत्तेरिति। तथा चोपदर्शितानुमानेयपक्षतावच्छेदकासिद्धिः बाधश्चेति भावः। कर्मजेति। यथा श्येनक्रियया श्येन
शैलसंयोगः। अवयवसंयोगजेति। कारणाकारणसंयोगात्कार्याकार्यसंयोगः। यथा हस्ततरुसंयोगात्कायतरुसंयोग इत्यर्थः।।
न च विभ्वोरिति। मूर्त्तत्वं द्रव्यत्वं विभुत्वं संहत्यावच्छिन्नं प्रति मूर्त्तत्वेन कारणतया मूर्त्तत्वाभावेनोत्पन्नकर्मासत्त्वादिति भा
वः अन्यतरेति। आत्ममनसोः। तत्संयोगजः अवयवसंयोगजः। मानाभावादिति नित्यसंयोगग्राहकप्रमाणस्याभावात् अनुमान
स्याप्रयोजकत्वादित्यर्थः। साधकाभावः मुक्ता बाधकमप्याह। संयोगत्वावच्छेदेनेति। संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतु

त·प्र
४८

तायां तत्कार्यतावच्छेदकं जन्यसंयोगत्वमेव नित्यसंयोगांगीकर्त्तृणां च । कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वात्तथा
च जन्यत्वनिवेशो विनष्टत्वात्कार्ये प्रतिकूलतर्क इति भावः ॥ ननु लाघवाय तत्प्रतिसामानाधिकरण्यसंबन्धेनावयवहृदा
नां हेतुत्वं कपालादौ धारावच्छिन्नयोरपत्वात् तेजस्त्वसत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वात् एकत्वसंयोगत्वावच्छिन्नं प्रति तद्धेतु
त्वे मानाभाव इति न दर्शितत्वात् । समवेतत्वाह अप्रयोजकं चेदमिति यद्वा नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वे क्षतिविरहात् तत्स्था
ह अप्रयोजकं चेदमिति इदं विपक्षसाधकमनुमानमित्यर्थः अनुकूलतर्काभावादिति भावः संयोगत्वावच्छेदेनेति संयोगत्वस्य
द्रव्यजन्यत्वव्याप्यत्वे न नित्यसंयोगास्वीकारे तादृशनियमस्यास्वरसेनाह इति भावः ननु तादृशनियमे मानाभाव इत्यत आह अप्र
योजकं चेत्यपरे नानाकविचारसौकर्यमतिनापत्तिं किंचिदुक्तं मयाऽत्र द्रष्टव्यं तु इह तावद्भावव्युत्पित्सूनां सारार्थसंग्रहकोऽयं ह्येतद्
द्विधा येऽपि जनाः सज्जास्ते सौविशब्दग्रहदुःप्राणदक्षाण हृद्गताधीनैकहृद्गताः कृताः । इति श्रीमद्धिन्दुकुटमालिकापालजि
नीरजजननीराजितपदद्वंद्वनारायणगीतांश्रोहतहितसुतेश्च कृतश्रमविरचितायां तारायणसिद्धान्तमंजरीतर्कदीपिकायां प्रत्यक्षखंडः स
माप्तः ॥ ॥

राम
४८

९०
३(B)

अभवाम॥ विधिलिङ्॥ भवेत्॥ भवेतां॥ भवेयुः॥ भवेः॥ भवेतं॥ भवेत॥ भवेयं॥ भवेव
॥ भवेम॥ आशीर्लिङ्॥ भूयात्॥ भूयास्तां॥ भूयासुः॥ भूयाः॥ भूयास्तं॥ भूयास्त॥ भू
यासं॥ भूयास्व॥ भूयास्म॥ लुङ्॥ अभूत्॥ अभूतां॥ अभूवन्॥ अभूः॥ अभूतं
॥ अभूत॥ अभूवं॥ अभूव॥ अभूम॥ लृङ्॥ अभविष्यत्॥ अभविष्यतां॥ अभवि
ष्यन्॥ अभविष्यः॥ अभवि,ष्यतं॥ अभविष्यत॥ अभविष्यं॥ अभविष्याव॥ अभ
विष्याम॥ माङ्योगे॥ लुङ्॥ मा भवान् भूत्॥ स्मोत्तरे माङ्योगे तु लुङ्लङ् च॥ इ
मा स्म भूत्॥ मा स्म भवत्॥ एध वृद्धौ॥ लट्॥ एधते॥ एधेते॥ एधंते॥ एधसे॥ एधे
थे॥ एधध्वे॥ एधे॥ एधावहे॥ एधामहे॥ लिट्॥ एधांचक्रे॥ एधांचक्राते॥ एधां
चक्रिरे॥ एधांचकृषे॥ एधांचक्राथे॥ एधांचकृढ्वे॥ एधांचक्रे॥ एधांचकृवहे॥ एम ९

एधांचकृमहे॥ १॥ एधांबभूव॥ १॥ एधामास॥ १॥ लुट्॥ एधिता॥ एधितारौ॥ एधि
तारः॥ एधितासे॥ एधितासाथे॥ एधिताध्वे॥ एधिताहे॥ एधितास्वहे॥ एधिता
स्महे॥ लृट्॥ एधिष्यते॥ एधिष्येते॥ एधिष्यंते॥ एधिष्यसे॥ एधिष्येथे॥ एधिष्य
ध्वे॥ एधिष्ये॥ एधिष्यावहे॥ एधिष्यामहे॥ लोट्॥ एधतां॥ एधेतां॥ एधंतां॥ ए
धस्व॥ एधेथां॥ एधध्वं॥ एधै॥ एधावहै॥ एधामहै॥ लङ्॥ एधत॥ एधेतां॥ ऐधंत
॥ एधथाः॥ ऐधेथां॥ ऐधध्वं॥ ऐधे॥ ऐधावहि॥ ऐधामहि॥ विधिलिङ्॥ एधेत॥ ए
धेयातां॥ एधेरन्॥ एधेथाः॥ एधेयाथां॥ एधेध्वं॥ एधेय॥ एधेवहि॥ एधे
महि॥ आशीर्लिङ्॥ एधिषीष्ट॥ एधिषीयास्तां॥ एधिषीरन्॥ एधिषीष्ठाः॥
एधिषीयास्थां॥ एधिषीढ्वं॥ एधिषीय॥ एधिषीवहि॥ एधिषीमहि॥ लुङ्॥

१० / 3(B)

दश ऐधिष्ट॥ऐधिषातां॥ऐधिषत॥ऐधिष्ठाः॥ऐधिषाथां॥ऐधिढ्वं॥ऐधिषि॥
ऐधिष्वहि॥ऐधिष्महि॥लृङ्॥ऐधिष्यत॥ऐधिष्येतां॥ऐधिष्यंत॥ऐधिष्यथाः॥ऐ
धिष्येथां॥ऐधिष्यध्वं॥ऐधिष्ये॥ऐधिष्यावहि॥ऐधिष्यामहि॥स्पर्ध संघर्षे॥
स्पर्धते॥पस्पर्धे॥स्पर्धिता॥स्पर्धिष्यते॥स्पर्धतां॥अस्पर्धत॥स्पर्धेत॥स्प
र्धिषीष्ट॥अस्पर्धिष्ट॥अस्पर्धिष्यत॥इति दशलकाराः॥छ॥छ॥छ॥श्री॥
सस्ति सपाति अस्ति प्र० स्तः०। संति प्रथमपुरुष असि स्थः स्थ मध्यमपुरु०
अस्मि स्वः स्मः पुरुष॥जायति॥जायतः॥जायंति॥जायसि जायथः जा
यथ जायामि जायावः जायामः॥॥ रामराम श्रीराम॥ छ॥॥ राम
करोति कुरुतः कुर्वंति करोषि कुरुथः। कुरुथ २

"धातुरूपावलिः" १० / 3(B)

१० / 3(B) १० / ३(बी)

श्रीगणेशाय नमः॥भूसत्तायां॥उदात्तः परस्मैपदं॥लट्॥स भवति॥तौ भवतः॥ते भवंति
॥त्वं भवसि॥युवां भवथः॥यूयं भवथ॥अहं भवामि॥आवां भवावः॥वयं भवामः॥वर्तमा
ने लट्॥वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात्॥परोक्षे लिट्॥लिट्॥बभूव॥बभूवतुः॥
बभूवन् बभूवुः॥बभूविथ॥बभूवथुः॥बभूव॥बभूविव॥बभूविम॥लुट्॥भविता॥भवि
तारौ॥भवितारः॥भवितासि॥भवितास्थः॥भवितास्थ॥भवितास्मि॥भवितास्वः॥भ
वितास्मः॥लृट्॥भविष्यति॥भविष्यतः॥भविष्यंति॥भविष्यसि॥भविष्यथः॥भवि
ष्यथ॥भविष्यामि॥भविष्यावः॥भविष्यामः॥लोट्॥भवतु॥भवतात्॥भवतां॥
भवंतु॥भव॥भवतात्॥भवतं॥भवत॥भवानि॥भवाव॥भवाम॥लङ्॥अभवत्॥
॥अभवतां॥अभवन्॥अभवः॥अभवतं॥अभवत॥अभवं॥अभवाव॥२